छान्दोग्ये। सदेवसौम्यदमग्र आसीदेकमेवाद्वितीयम्। बृहदारण्यके। पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।। श्रीमद्भागवते। अहमेवासमेवाग्रे नान्यद् यत् सदसत् परं पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं। श्री चैतन्य चरितामृते श्रीमन्महाप्रभुः। कृष्णेर स्वरूपविचार शुन सनातन। अद्वय ज्ञान तत्व व्रजे व्रजेन्द्रनन्दन ।। २ ।।

The Supreme Reality is the One without second ॥ 2 ॥

ओं हरिः ॥ नित्यं अचिन्त्य शक्तिकम् ॥ हरिः ओं ॥ ३ ॥

श्वेताश्वतरे। विचित्र शक्तिः पुरुषः पुराणो चान्येषां शक्तयस्तादृशस्युः। एको वशी सर्वभूतान्तरात्मा सर्वान् देवानेक एवानुविष्टः ।।

हयशीर्ष पंचरात्रे। परमात्मा हरिदेवस्तच्छक्तिः श्रीविहोदिता। श्रीदेवी प्रकृतिः प्रोक्ता केशवः पुरुषः स्मृतः ।। श्री जीव गोस्वामी। सर्वेषां भावानां पावकस्योष्णतावदचिन्त्यज्ञानगोचराः शक्तयः सन्त्येव। ब्रह्मणस्ता स्वभावभूताः स्वरूपादभिन्न शक्तयः ।। ३ ।।

That Reality is eternally existent and also endowed with inconceivable infinite Potency. ॥ 3 ॥

ओं हरिः ॥ नित्यं सविशेषम् ॥ हरिः ओं ॥ ४ ॥

श्वेताश्वतरे । स वृक्ष कालाकृतिभिः परोऽन्यो यस्मात् प्रपंचः परिवर्त्तते यं । धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थं अमृतं विश्वधाम ॥ ज्ञान शक्तिवलैश्वर्य वीर्य तेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ श्री रूपगोस्वामी । सदा स्वरूप संप्राप्तः सर्वज्ञो नित्यनूतनः । सच्चिदानन्दसान्द्रांगः सर्व सिद्धि निषेवितः ॥ ४ ॥

The Reality is eternally endowed with transcendental qualifications. ‖ 4 ‖

ओं हरिः ॥ नित्यं निर्विशेषंच ॥ हरिः ओं ॥ ५ ॥

कठे । अशब्द मस्पर्शमरूपमव्ययं तथाऽरसन्नित्य मगंध वच्चयत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥ हरिवंशे । ब्रह्मतेजोमयं दिव्यं महद् यद्दृष्टवानसि । अहं स भरत श्रेष्ठमभेजस्तत् सनातनम् ॥ श्रीमन्महाप्रभु । निर्विशेष तारे कहे येइ श्रुतिगण । प्राकृत निषेधि करे अप्राकृत स्थापन ॥ ५ ॥

The Supreme Reality is simultaneously unqualified ‖ 5 ‖

ओं हरिः ॥ विरुद्ध धर्म सामंजस्यं तदचिन्त्य शक्तित्वात् ॥ हरिः ओं ॥६॥

श्वेताश्वतरे । अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ॥ स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तं । कौर्मे । ऐश्वर्य योगाद् भगवान् विरुद्धार्थोऽभिधीयते । तथापि दोषाः परम नैवाहार्याः कदाचनः ॥ श्री जयतीर्थ मुनिः । न केवलं सामान्यतो बिचित्र शक्तिरीश्वरः किन्तु सर्वविषये सर्वदा विद्यमान विचित्र शक्तिः ॥ श्री जीवः । धर्म एव धर्मित्वं निर्भेद एव नाना भेदवत्वं अरूपित्व एव रूपित्वं व्यापकत्व एव मध्यमत्वं इति परस्पर विरुद्धानन्त गुणनिधिः ॥ ६ ॥

Owing to the inconceivable potency of the Supreme, both the mutually opposite characters of qualifying and non-qualifying natures are perfectly assimilated in the Supreme, beyond the scope of any controversy. ‖ 6 ‖

**ओं हरिः ॥ सविशेषत्वमेव बलवदितरानुपलब्धे ॥ हरिः ओं ॥ ७ ॥**

ऋग्वेद संहितायां । तद्विष्णो परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते । विष्णोर्यत् परमं पदं । महावराहे । सर्वे नित्याः शाश्वताश्च देहाद्यस्य परात्मनः । हेयोपादेय रहिताः नैव प्रकृतिजा क्वचित् ।। परमानन्दसन्दोह ज्ञान मात्राच सर्वतः देह देहि भिदा चात्र नेश्वरे विद्यते क्वचित् ।। श्रीजीवः । अखण्ड तत्वरूपो भगवान् सामान्याकारस्य स्फूर्ति लक्षणत्वेन स्वप्रभाकारस्य ब्रह्मणोप्याश्रय इति युक्त मेव ।। ७ ।।

Qualified phase of the Supreme Reality is the most prominent among the both, since the unqualified state is incomprehensible. ॥ 7 ॥

**ओं हरिः ॥ स्वरूप-तद्रूपवैभव-जीव-प्रधान-रूपेण तच्चतुर्द्धा ॥ हरिः ओं ॥ ८ ॥**

श्वेताश्वतरे । स विश्वकृद्विश्वविदात्मयोनिः कालकारोगुणी सर्वविद्यः । प्रधान क्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः । भागवते । भक्ति योगेन मनसि सम्यक् प्रणिहितेऽमले । अपश्यत् पुरुषं पूर्णं मायांच तदपाश्रयाम् ।। यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् । परोपि मनुतेऽनर्थं तत्कृतंचाभिपद्यते ।। श्री जीवः । एक मेवं परमं तत्वं स्वाभाविकाचिन्त्य शक्त्या सर्वदैव स्वरूप तद्रूपवैभव-जीवप्रधानरूपेण चतुर्धावतिष्ठते ।। ८ ।।

That super prominent qualified phase of the Supreme is eternally existent in the four fold forms of Swarupa (divine Form), Tadrupa Vaibhava (divine variegatedness), Jiva (individual souls) and Pradhāna (Māya, material cause of the phenomenal universe). ॥ 8 ॥

**ओं हरिः ।। अचिन्त्य भेदाभेदात्मकं ।। हरिः ओं ॥ ९ ॥**

इति श्री आम्नायसूत्रे सम्बन्धतत्व निरूपणे शक्तिमत्तत्वप्रकरणं समाप्तं ।।

कठे। एको वशी सर्व भूतान्तरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीरा स्तेषां सुखं शाश्वतं नैतरेषां ।। भागवते। यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु। प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ।। पाद्मे। अचिन्त्ययैव शक्त्यैव एकोऽवयववर्जितः। आत्मानं बहुधा कृत्वा क्रीडते योग सम्पदा ।। श्री जीवः। स्वमतेत्व-चिन्त्य-भेदाभेदावेव।

इति शक्तिमत्तत्व प्रकरण सूत्र भाष्यं समाप्तं ।। ९ ।।

These four types of eternal revelations are simultaneously distinct and non-distinct from each other, which is a supra-logical fact. ‖ 9 ‖

---

## शक्तिप्रकरणम्

**ओं हरिः ॥ ह्लादिनी-सन्धिनी-सम्बिदिति पर शक्तेः प्रभावत्रयम् ॥ हरिः ओं ॥ १० ॥**

श्वेताश्वतरे। न तस्य कार्यं करणंच विद्यते नतत् समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञान बल क्रियाच।। विष्णुपुराणे-ह्लादिनी सन्धिनी सम्बित् स्त्वय्येका सर्वसंस्थितौ। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते।। श्री चैतन्यचरितामृते। सच्चित् आनन्दमय ईश्वर स्वरूप। तिन अंशे चिछक्ति हय तिन रूप।। आनन्दांशे ह्लादिनी सदंशे सन्धिनी। चिदंशे सम्बित् यारे कृष्ण ज्ञान मानि।। १० ।।

Hlādini, Sandhini and Sambit—these three are the dominating faculties of the one Parāshakti. ‖ 10 ‖

**ओं हरिः ॥ सैव स्वतोऽन्तरंगा-बहिरंगा-तटस्था ॥ हरिः ओं ॥ ११ ॥**

श्वेताश्वतरे। तेध्यान योगानुगता अपश्यन् देवात्मशक्ति स्वगुणैर्निगूढां।। अजामेका लोहित कृष्णशुक्लां। समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमानः। विष्णुपुराणे। विष्णुशक्तिः पराप्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा। अविद्या कर्मसंज्ञान्या तृतीयो शक्तिरिष्यते।।

श्री जीव: । शक्तिश्च सात्रिधा अन्तरंगा तटस्था बहिरंगाच । श्री कविराज: । चिच्छक्ति जीवशक्ति आर मायाशक्ति ।। ११ ।।

The same Parashakti acts as Antarangā, Bahirangā and Tatasthā. ‖ 11 ‖

ओं हरि: ॥ तद्दीक्षणाच्छक्तिरेव क्रियावती ॥ हरि: ओं ॥ १२ ॥

इति श्री आम्नायसूत्रे सम्बन्ध तत्व निरूपणे शक्ति प्रकरणं समाप्तं।

प्रश्नोपनिशदि । स ईक्षां चक्रे ।। ऐतरेये । स ईक्षत लोकान्नु सृजा इति । स इमान् लोकानसृजत ।। वामनपुराणे । तत्र तत्र स्थितो विष्णु स्तत्तच्छक्ती: प्रबोधयन् । एका एव महाशक्ति: कुरुते सर्वमंजसा ।। श्री भगवद् गीतायां । मयाध्यक्षेण प्रकृति: सूयते सचराचरं । हेतुनानेन कौन्तेय जगद्विपरिवर्तते ।। श्री मन्महाप्रभु । शक्ति प्रधान कृष्ण इच्छाय सर्वकर्ता । जडरूपा प्रकृति नहे ब्रह्माण्ड कारण । मायाद्वारे सृजे तेहँ ब्रह्माण्डेर गण ।। १२ ।।

इति श्री आम्नायसूत्र भाष्ये शक्तिप्रकरण भाष्यं समाप्तं ।

The shakti or the Divine Potency becomes activated by means of the Glance of the Qualified Supreme Principle. ‖ 12 ‖

---

## स्वरूप प्रकरणं

ओं हरि: ॥ स्वरूपं त्रिविधम् ॥ हरि: ओं : ॥ १३ ॥

श्वेताश्वतरे । उद्गीतमेतत् परमन्तु ब्रह्मतस्मिन् स्त्रयं सुप्रतिष्ठिताक्षरंच । तत्रान्तरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनि मुक्ता: । भागवते । वदन्ति तत्तत्वविदस्तत्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्दयते ।। श्री मन्महाप्रभु । ज्ञान योग भक्ति तिन साधनेर वशे । ब्रह्म आत्मा भगवान त्रिविध प्रकाशे ।। १३ ।।

The Divine Principle is realised in three different attributes. ‖ 13 ‖

**ओं हरिः ॥ ज्ञाने चिन्मात्रं ब्रह्म ॥ हरिः ओं ॥ १४ ॥**

तलवकारे । यद्वाचानभ्यूदितं यन्मनसा नमनुते यच्चक्षुषा न पश्यन्ति यच्छ्रोत्रेण न शृणोति यत् प्राणेन न प्राणिति तदेव ब्रह्म तं विद्धि ।। मान्डूक्ये सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ।। गीतायां । ब्रह्मणोहि प्रतिष्ठाह ममृतस्याव्ययस्यच । शाश्वतस्य च धर्मस्य सुखमैकान्तिकस्यच ।। श्रीमन्महाप्रभु । ब्रह्म अंगकान्ति ताँर निर्विशेष प्रकाशे । सूर्य येन चर्मचक्षे ज्योतिर्मय भासे ।। १४ ।।

In the performance of gnosticism the Divinity is realised as the unqualified transcendental Brahman. ॥ 14 ॥

**ओं हरिः ॥ योगे विश्वमय परात्मा ॥ हरिः ओं ॥ १५ ॥**

ऐतरेये । आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन निषत् ।। श्वेताश्वतरे । अंगुष्ठमात्रः पुरूषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । हृदा मन्वीशो मनसाभिक्लिप्तो यत्रतद्विदुरमृतास्ते भवन्ति ।। नारदीयतंत्रे । विष्णोस्तु त्रीणि रूपाणि षुरूषाखान्यथो विदुः । प्रथमं महतः स्रष्ट्र द्वितीयं त्वण्ड संस्थितं । तृतीयं सर्व भूतस्थं ताविज्ञात्वा विमुच्यते ।। श्री मन्महाप्रभु । परमात्मा येँहो तिँहो कृष्णेर एक अंश आत्मार आत्मा हन कृष्ण सर्व अवतंस ।। १५ ।।

In the performance of Astānga Yoga, the Divine principle is realised as the immanent Paramātman ॥ 15 ॥

**ओं हरिः ॥ तदवताराह्यसंख्या ॥ हरिः ओं ॥ १६ ॥**

चतुर्वेद शिखायां । वासुदेवः संकर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मः वराहो नृसिंहो वामनो रामः रामो बुद्ध कल्किरहमिति ।। भागवते । अवताराह्यसंख्येया हरेः सत्वनिधेर्द्विजाः । यथा विदासिनः कूल्याः सरसः स्युः सहस्रशः ।। श्रीमन्महाप्रभु । पुरुषावतार एक लीलावतार आर । गुणावतार आर मन्वन्तरावतार ।। युगावतार आर शक्तयावेशावतार ।। १६ ।।

Innumerable are the Manifestations of the Paramatman ॥ 16 ॥

**ओं हरिः ॥ सर्वे चिच्छक्तिमन्तो महेश्वराः ॥ हरिः ओं ॥ १७ ॥**

चतुर्वेद शिखायां नैवेते जायन्ते नैतेषामज्ञानबन्धो न मुक्तिः। सर्व एषह्येते पूर्णा अजरा अमृताः परमाः परमानन्द इति ॥ वाराहे। स्वांशश्चाथो विभिन्नांश इति द्वेधांश इष्यते ॥ त्रैलोक्य सम्मोहन तन्त्रे। धर्मार्थकाममोक्षानामीश्वरो जगदीश्वरः। सन्ति तस्य महाभागा अवताराः सहस्रशः ॥ श्री मन्महाप्रभु। मायातीत परव्योम सवार अवस्थान। विश्वे अवतरि धरि अवतार नाम ॥ १७ ॥

All the Divine Manifestations like Amshāvatāra, Lilāvatāra, Yugavatara etc are the Supreme Lords endowed with the transcendental Potency viz Chit shakti. ‖ 17 ‖

**ओं हरिः ॥ भक्तौ पूर्णपुरुषो भगवान् ॥ हरिः ओं ॥ १८ ॥**

श्वेताश्वतरे। वेदाहमेतं पुरुषं महान्तं आदित्य वर्णं तमसः परस्तात्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ गर्ग संहितायां। पूर्णः पूराणः पुरुषोत्तमोत्तमः परात्परो यः पुरुषः परमेश्वरः। स्वयं सदानन्दमयं कृपाकरं गुणाकरं तं शरणं व्रजाम्यहम् ॥ श्री निम्बादित्य स्वामी। स्वभावतोऽपास्त समस्त दोषमशेष कल्याण गुणैकराशि। व्यूहांगिनं ब्रह्मपरं वरेण्यं ध्यायेमकृष्णं कमलेक्षणं हरिं ॥ १८ ॥

In the performance of Shuddha-Bhakti or unalloyed devotion, the Supreme Reality is Realised as Bhagavān, the fullest embodiment of Divine Personality ‖ 18 ‖

**ओं हरिः ॥ औदार्य-माधुर्यैश्वर्यभेदेन तत् स्वरूपमपि त्रिविधम् ॥ हरिः ओं ॥ १९ ॥**

श्वेताश्वयरे। तमीश्वराणां परमं महेश्वरं तं देवतानां परमंच दैवतं पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीडथं ॥ महान् प्रभुर्वैपुरुषः सत्वस्यैषः प्रवर्तकः। सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः ॥ गोपालोपनिषदि। सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्। द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरं ॥ मनुः। प्रशासितारं सर्वेषां अनीयांस मनोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परं। भागवते। न यत्र

कालोऽनिमिषां परः प्रभुः। नारद पंचरात्रे। मणिर्यथा विभागेन नीलपीतादिभिर्युतः। रुपभेदमवाप्नोति ध्यानभेदात्तथाच्युतः।। श्री चैतन्यचरितामृते। सेइ नारायण कृष्णेर स्वरूप अभेद।। सेइत गोविन्द साक्षाच्चैतन्य गोसाँई। जीव निस्तारिते ऐछे दयालु आर नाइ।। श्री चैतन्य चन्द्रोदय नाटके श्रीमदद्वैत प्रभु। नवकुवलयदाम श्यामलो वामजंघा हिततदितर जंघः कोऽपिदीव्यः किशोरः। त्वमिव स स इवत्वं गोचरोनैव भेदः कथय रूप्यमहोमे जाग्रतः स्वप्न एषः।। १९।।

That Bhagavan is realised in three different Forms called as of Aishwarya (Majesty), Madhurya (Sweetness), and Audarya (Munificence) ‖ 19 ‖

**ओं हरिः॥ स्वेन धाम्नात्मशक्त्याच सोऽप्यवतरति॥ हरिः ओं ॥ २०॥**

इति श्री आम्नायसूत्रे सम्बन्ध तत्व निरूपणे स्वरूप प्रकरणं समाप्तं।

चैतन्योपनिषदि। गैरः सर्वात्मा महापुरुषो महात्मा महायोगी त्रिगुणातीत सत्वरूपो भक्ति लोके काश्यतीति।। तलबकारे। तद्वैषां विजज्ञो तेभ्यो प्रादुर्बभूव। तस्मात्तिरोदधे कालिकापुराणे देवी स्तुतौ तस्य ब्रह्मादयो देवा मुनयश्च तपोधनाः नविवृण्वन्ति रूपाणि वर्णनीयः कथं स मे।। श्री गोविन्द दासस्य प्रार्थना। हरि हरि बड दुःख रहल मरमे। गौर कीर्तन रसे जगजन मातल, वंचित मो हेन अधमे। व्रजेंद्र-नन्दन येइ शचीसुत भेल सेइ, वलराम हइल निताइ।। दीन हीन यत छिल, हरिनामे उद्धारिल, तार साक्षी जगाई माधाई। हेन प्रभु श्रीचरणे रति ना जन्मिल केने, ना भजिलाम हेन अवतार।। दारुण विषय विषे, सतत मजिया रनु. मुखे दिनु ज्वलन्त अंगार।। एमन दयालु दाता, आर ना पाइव कोथा, पाइया हेलाय हाराइनु। गोविन्द दासिया कय, अनले पुडिनु नय, सहजेइ आत्मघाति हइनु।। ।।२०।।

इति स्वरूप प्रकरण भाष्यं समाप्तं।

Divine Manifestations of Bhagawan descend to this mundane world, along with His transcendental abode by the power of His own Internal Potency ‖ 20 ‖

---

## धाम प्रकरणम्

**ओं हरिः ॥ तत्तत् स्वरूप वैभवं धामनिचयं ॥ हरिः ओं ॥ २१ ॥**

मुण्डके । सत्ये न लभ्यस्तपसा ह्येष आत्मा सम्यक् ज्ञानेन ब्रह्मचर्येण नित्यं । अन्तः शरीरे ज्योतिर्मयोहि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः । ब्रह्माण्डपुराणे । सिद्धलोकस्तु तमसः पारे यत्र वसन्ति हि । सिद्धा ब्रह्मसुखे मग्ना दैत्याश्च हरिणा हताः ।। श्री कविराज गोस्वामी । सन्धिनीर सार अंश शुद्ध सत्व नाम । भगवानेर सत्ता हय ताहाते विश्राम ।। २१ ।।

Every Divine Manifestation is associated with the respective abode of the Supreme Reality. ॥ 21 ॥

**ओं हरिः ॥ ज्योतिर्ब्रह्मणः ॥ हरिः ओं ॥ २२ ॥**

मुण्डके । तेषामेवैष ब्रह्मलोका येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितं । भागवते । ऋषयो वात रसना श्रमणा ऊर्ध्वमन्थिनः । ब्रह्माख्यं धाम ते यान्ति शान्ताः सन्यासिनोऽमलाः । चरितामृते । वैकुण्ठ बाहिरे एक ज्योतिर्मय मण्डल । कृष्णेर अंगेर प्रभा परम उज्वल ।। निर्विशेष ज्योतिर्विम्ब बाहिरे प्रकाश । सायुज्येर अधिकारी ताँहा पाय लय ।। २२ ।।

Divine Effulgence is the abode of Brahman ॥ 22 ॥

**ओं हरिः ॥ विश्वं परमात्मनः ॥ हरिः ओं ॥ २३ ॥**

कठे । यदिदं किंच जगत् सर्वं प्राण एजति निःसृतं । महद्भयं वज्रमुद्यतं यत्र तद्विदुरमृतास्ते भवन्ति । भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचमः ।। पाद्मे । त्रिपाद विभूते र्धामस्तत्रिपाद्भूतं हि तत्पदं । विभूतिर्मायिकी सर्व प्रोक्ता पादात्मिका मतः ।। श्री कविराज । अन्तरात्मा रूपे तिँहो जगत् आधार ।। प्रकृति सहित ताँर उभय सम्बन्ध । तथापि प्रकृति सह नाहि स्पर्ष गन्ध ।। २३ ।।

Universe is the abode of Paramatman ॥ 23 ॥

ओं हरिः ॥ परव्योम भगवतः ॥ हरिः ओं ॥ २४ ॥

इति श्री आम्नायसूत्रे सम्बन्धतत्व निरूपणे धाम प्रकरणं समात्तं।

तैत्तिरिये । ॐ ब्रह्म विदाप्नोति परं । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहातां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति ।। गीतायां । नतद् भासयते सूर्यो न शशांको न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।। पाद्मे । तस्याः पारे परव्योम त्रिपाद्भूतं सनातनं । अमृतं शाश्वतं नित्यमनन्त परमं पदं ।। श्री कविराज । प्रकृतिर पार परव्योम नाम धाम । ताहार उपरिभागे कृष्ण लोक ख्याति। सर्वोपरि श्री गोकुल ब्रजलोक नाम। गोलोकस्थ श्वेतद्वीपे वृन्दावन धाम ।। २४ ।।

Paravyoma Vaikuntha is the transcendental abode of Bhagawān ‖ 24 ‖

---

## बहिरंगामाया वैभव प्रकरणम् ।

ओं हरिः ॥ स्वरूपवैभव प्रतिच्छवि रूपा माया ॥ हरिः ओं ॥ २५ ॥

श्वेताश्वतरे। नतत्र सूर्यो भाति न चन्द्र तारकं नेमे विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।। भागवते । इदं हि विश्वं भगवानिवेतरो यतो जगत् स्थान निरोध-सम्भवाः। तद्धिस्वयं वेदभावांस्तथापिते प्रदेश मात्रं भवतः प्रदर्शितं।। श्री जीवः। बहिरंगया माययाख्याया प्रतिच्छविगत वर्णसावल्यस्थानीय बहिरंगवैभवजडात्मप्रधानरूपेण। आभासोर्ज्योतिर्बिम्बस्य स्वीय प्रकाशात् व्यवहित प्रदेशे कथंचिदुच्छलितः प्रतिच्छवि विशेषः ।। २५ ।।

Māyā is the reflected image of the eternally manifested Divine abode. ‖ 25 ‖

ओं हरिः।। प्रधानादि पदवाच्या ।। हरिः ओं ।। २६ ॥

वृहदारण्यके । अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।। श्वेताश्वतरे । क्षरं प्रधानमिति । महा संहितायां श्रीभूदुर्गेति याभिन्ना जीवमाया-महात्मनः । आत्ममाया तदिच्छास्याद् गुणमाया जडात्मिका।

श्री निम्बादित्य स्वामी । माया प्रधानादि पद प्रवाच्या शुक्लादि भेदा समेपि तत्र ।। श्री जीवः । तस्याप्याभासाख्यत्वमपि ध्वनितं ।। २६ ।।

Maya is also denoted by the terms 'Pradhāna' etc. ॥ 26 ॥

**ओं हरिः ॥ गुणात्मिका स्थूललिंगाभ्यां चिदावरणीच ॥ हरिः ओं ॥ ॥ २७ ॥**

श्वेताश्वतरे । अष्टकैः षड्भिर्विश्वरूपैक पाशं त्रिमार्गभेदं द्विनिमित्तैकमोहं ।। मार्कण्डेयपुराणे । तन्नात्र विस्मयःकार्यो योगनिद्रा जगत्पतेः । महामायां हरेश्चैतत् तया संमोह्यते जगत् । गीतायां । दैवी ह्येषा गुणमयी मम माया दुरत्यया । श्री जीवः । यद्यपीयं बहिरंगा तथाप्य स्यान्तटस्थ शक्तिमयमपि जीवमावरितुं सामर्थ्यमस्तीति । इयमपि जीवज्ञानमावृणोति ।। २७ ।।

Satwaguna, Rajoguna and Tamoguna are the nature of Māyā, by which it encovers the sentient spirits through gross and subtle bodies. ॥ 27 ॥

**ओं हरिः ॥ तस्मिन् देशकालकर्मादि जडव्यापार विशेषाः ॥ हरिः ओं ॥ ॥ २८ ॥**

श्वेताश्वतरे-छंदांसि यज्ञा क्रतवो व्रताणि भूतं भव्यं यच्च वेदो वदन्ति । यस्मान् मायी सृजते विश्वमेतत् तस्मिश्चान्यो मायया सन्निरूद्धं ।। भागवते । सा वा एतस्य संद्रष्टुः शक्तिः सद सदात्मिका । माया नाम सहाभाग ययेदं निर्ममे विभुः । श्री बलदेव विद्याभूषणः । प्रकृतिः सत्वादिगुण साम्यावस्था तमो मायादि शब्द वाच्या कालन्तु निमित्त भूतो जडद्रव्य विशेषः कर्मंतु जड मदृष्टादि व्यपदेश्यमनादि विनाशीच ।। २८ ।।

Non-sentient things like space, time, action (karma) etc., are constituted in that Māyā. ॥ 28 ॥

**ओं हरिः ॥ बहिरंग वैचित्रन्तु अन्तरंग वैचित्र विकृतिः ॥ हरिः ओं ॥ ॥ २९ ॥**

**इति श्री आम्नायसूत्रे संबन्धतत्व निरूपणे बहिरंगमाया वैभव प्रकरणं समाप्तं ।**

मुण्डके। अस्मिन् द्यौः पृथिवी चान्तरीक्ष मोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथः आत्मान मन्यावाचो विमुंचथ अमृतस्यैषः प्रभुः ।। एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।। भागवते । भूतानां नभ आदिनां यद्यद्भव्यावरावरं । तेषां परानुसंसर्गात् यथा संख्यं गुणान् विदुः ।। श्री मन्महाप्रभु। यैछे सूर्येर स्थाने भासये आभास। सूर्य विना स्वतः तार ना हय प्रकाश ।। विद्यापति ठाकुरेर अप्राकृत वृन्दावन वर्णन। बहिरंग प्राकृत वैचित्र इहार विकृति । नव वृन्दावन, नवीन तरूगण, नव नव विकशित फूल । नवीन वसन्त नवीन मलयानिल, मातल नव अलिकुल । विहरइ नउल किशोर कालिन्दि पुलिन, कुंज नव शोभन, नव नव प्रेम विभोर । नवीन रसाल, मुकुल मधु मातिया नव कोकिल कुल गाय, नव युवतीगण, चित उमतायइ नव रसे कानने धाय । नव युवराज, नवीन नागरी मिलये नव नव भाति । निति निति ऐछन, नव नव खेलन विद्यापति मति माति इति ।। २९ ।।

इति बहिरंगमाया वैभवप्रकरण भाष्यं समाप्तं ।

Phenomenal variegatedness of the external Māyā is the perverted reflection of the transcendental variegatedness. ‖ 29 ‖

---

## जीवतत्व प्रकरणम् ।

**ओं हरिः ॥ परात्म सूर्यकिरण परमाणवो जीवाः ॥ हरिः ओं ॥ ३० ॥**

बृहदारण्यके । यथाग्ने क्षुद्रा विस्फुलिंगा व्युच्चरन्ति एवमेवास्मा दात्मन सर्वाणि भूतानि व्युच्चरन्ति।। श्वेताश्वतरे । वालाग्र शतभागस्य शतधा कल्पितस्य च। भागो जीवः सविज्ञेयः सचानन्ताय कल्पचते ।। गीतायां । भूमिरापोनलो वायु खं मनो बुद्धिरेवच । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां - जीवभूतां महावाहो ययेदं धार्यते जगत् ।। श्री मन्महाप्रभु। जीवेर स्वरूप हय कृष्णेर नित्य दास । कृष्णेर तटस्थशक्ति भेदाभेदप्रकाश ।। सूर्यांशु किरण येन अग्नि ज्वाला चय ।। ३० ।।

**Individual souls are the atomic rays of 'Paramatman-the spiritual Sun. ‖ 30 ‖**

**ओं हरिः ॥ उभय वैभवयोग्यास्तटस्थ धर्मात् ॥ हरिः ओं ॥ ३१ ॥**

बृहदारण्यके । अस्य वा एतस्य पुरूषस्य द्वे एव स्थाने भवत इदञ्च परलोक स्थानञ्च सन्धं तृतीयं स्वं ।। भागवते । तस्मात् भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मानां ।। बीजनिर्हरणं योगः प्रवाह् परमो धियः ।। श्री निम्बादित्य स्वामी । अनादि माया परिमुक्त रूपं त्वेनं विदुर्वें भगवत् प्रसादात् । बद्धञ्च मुक्तञ्च किल बद्ध मुक्तं प्रभेद बाहुल्यं तथापि बोध्यं ।। ३१ ।।

Because of their marginal character, the jiva-souls are capable of serving either in the transcendental abode of the Supreme Lord, or in the phenomenal universe of Māyā. ॥ 31 ॥

**ओं हरिः ॥ स्वरूपतः शुद्ध चिन्मयाः ॥ हरिः ओं ॥ ३२ ॥**

बृहदारण्यके । स्वप्नेन शरीरमपि प्रहत्या सुप्तः सुप्तानभिचाकशाति शुक्रमादाय पुनरेति स्थानं हिरण्मयं पुरूष एक हंसः । भागवते । आत्मा नित्योऽव्यय शुद्ध एकः क्षेत्रज्ञ आश्रयः । अविक्रियः स्वदृग्धेतुर्व्यापकोऽसंगानावृतः । श्री शंकराचार्य स्वामी । अतः स्थितंचैतत् न्यायतो नित्यं स्वरूपं चैतन्य ज्योतिष्टमात्मनः ।। ३२ ।।

Essential nature of the jive-souls is purely transcendental ॥ 32 ॥

**ओं हरिः ॥ अस्मदर्थाः ॥ हरिः ओं ॥ ३३ ॥**

श्वेताश्वतरे । अंगुष्ठमात्रो रवितुल्य रूपो संकल्पाहंकार समन्वितो यः । बुद्धेर्गुणे नात्मगुणेन चैव आराग्र मात्रोप्यपरोपि दृष्टः ।। पाद्मोत्तरखण्डे । अहमर्थोऽव्ययः क्षेत्री भिन्नरूपः सनातनः । अदाह्योऽच्छेद्य अक्लेद्य अशोष्याक्षय एव च । एवमादिगुणैर्युक्तः शेषभूतः परस्यवै ।। श्रीमन्महाप्रभु । विभिन्नांश जीव ताँर शक्तिते गणन ।। सेइ विभिन्नांश जीव दुइ त प्रकार । एक नित्य मुक्त एक नित्य संसार ।। ३३ ।।

Every jiva-soul is an atomic sentient principle endowed with individual ego. ॥ 33 ॥

**ओं हरिः ॥ ज्ञान ज्ञातृत्व गुणकाश्च ॥ हरिः ओं ॥ ३४ ॥**

मुण्डके । एषोऽनुरात्मा चेतसा वेदितव्यो यस्मिन् प्राण पंचधा सन्निवेश। प्राणैश्चित्तं सर्वमेतं प्रजानां यस्मिन् विशुद्धे विभात्येष आत्मा ।। भागवते । विलक्षण: स्थूल सूक्ष्माद्देहादात्मेक्षिता स्वदृक्। यथाग्निदारूणो दाह्योद्दाहकोन्य: प्रकाशक: ज्ञोऽतएव इति। वेदान्त सूत्रं तद्भाष्ये श्री बलदेव: । ज्ञ एव आत्मा ज्ञानस्वरूपते सति ज्ञातृस्वरूप: ।। ३४ ।।

Jiva-souls are endowed with the nature of-knowledge and the knower (by which it can know itself and the Suprme Reality). ॥ 34 ॥

**ओं हरिः ॥ परेशवैमुख्यात्तेषामविद्याभिनिवेशः ॥ हरिः ओं ॥ ३५ ॥**

मुण्डके । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यं पिप्पलं स्वाद्वत्यन्यश्नन्नन्योऽभिचाकशीति ।। समाने वृक्षे पुरूषो निमग्नोऽनिषया शोचति मुह्यमान: । जुष्टं यदा पश्यत्यन्यमीशमन्य महिमानमेति वीतशोक: ।। भागवते । भयं द्वितीयाभिनिवेशत: स्यादीशादपेतस्य विपर्यय: स्मृति: ।। श्री नयनानन्द दास । कलि घोर तिमिरे गरासल जगजन धरम करम बहुदूर । असाधने चिन्तामणि, विधि मिलाउल आनि, गोरा बड दयार ठाकुर ।। भाइरे भाइ गोरा गुण कहने ना याय । कत शतआनन, कत चतुरानन, बरणिया उर नाहि पाय ।। चारि वेद षड दरशन पडिया से यदि गौरांग नाहि भजे। किवा तार अध्ययन, लोचन विहीन येन, दर्पणे किवा तार काजे ।। वेद विद्या दुइ, किछुइ ना जानत, से यदि गैरांग जाने सार। नयनानन्द भणे सेइ से सकल जाने सर्वसिद्धि करतले तार ।। ३५ ।।

Because of their aversion to the Supreme Lord, the fallen jiva-souls are entangled in the nescience of Māyā. ॥ 35 ॥

**ओं हरिः ॥ स्व स्वरूप भ्रमः ॥ हरिः ओं ॥ ३६ ॥**

बृहदारण्यके । तद्यथा तृण जलायूका तृणस्यान्तं गत्वाऽन्यमाक्रम्यात्मानमुपसंहरत्येवाय मात्मेदं स्ररीरं निहत्या विद्यां गमयित्वाऽन्य माक्रम्यात्मानमुपसंहरति । अयमात्मेदं शरीरं निहत्याऽविद्या गमयित्वा-

न्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा देवं प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानां ।। भागवते । जन्तुर्वै भव एतस्मिन् यां यां योनिमनुव्रजेत् । तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ।। आत्म जाया सुतागारं पशुद्रविण वस्तुषु निरूढमूलहृदय आत्मानं बहुमन्यते ।। श्री चैतन्य चरितामृते । मायामुग्ध जीवेर नाहि कृष्ण स्मृतिज्ञान ।। ३६ ।।

For this very reason they have undergone the illusion of self-oblivion. ॥ 36 ॥

ओं हरिः ॥ विषम काम कर्मबन्धः ॥ हरिः ओं ॥ ३७ ॥

बृहदारण्यके । सवा अयमात्मा यथाकारी यथाचारी तथा भवति । साधुकारो साधु भवति पापकारी पापो भवति पुण्य पुण्येन कर्मणा भवति पापः पापेन ।। भागवते । स दह्यमाना सर्वांग एषामुद्वहनादिना । करोत्यविरतं मूढो दुरितानि दुराशयः ।। श्री मन्महाप्रभु । काम क्रोधेर दास हये तार लाथि खाय ।। ३७ ।।

Therefore, also they have been entangled with the terrific bondage of the activities of desires. ॥ 37 ॥

ओं हरिः ॥ स्थूल लिंगाभिमानजनित संसार क्लेशाश्च ॥
हरिः ओं ॥ ॥ ३८ ॥

कठे । अविद्याया मन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमाना । दन्द्रम्यमानाः परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः ।। भागवते । तत्राप्यजात निर्वेदो भ्रियमान स्वयम्भृतैः । जरयो पातु वैरूप्य मरणाभिमुखोगृहे ।। चरितामृते । अतएव माया तारे देय संसारदुःख ।। कभु स्वर्गे उठाय कभु नरके डूबाय । दण्ड्यजनेर राजा येन नदीते चुबाय ।। ३८ ।।

Although the jiva-souls are unalloyed sentience by their nature, the forgetfulness of the Supreme has put them in a miserable condition of suffering in this universe by identifying themselves with the subtle and gross coverings of mind and body. ॥ 38 ॥

**ओं हरिः ॥ तत् साम्मुख्यात् सर्वक्लेशनिवृत्तिः स्वरूप प्राप्तिश्च ॥ हरिः ओं ॥ ३९ ॥**

श्वेताश्वतरे । ज्ञात्वादेवं सर्वं पाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्यु प्रहानिः ।। मुण्डके । यदा पश्यः पश्यते रूक्मवर्णं कर्तारमीशं पुरूषं ब्रह्मयोनिं । तदा विद्वान् पुण्य पापे विधूय निरंजनः परमं साम्यमुपैति ।। श्री विष्णुधर्मे । जन्मान्तर सहस्रेषु तपोज्ञानसमादिभिः ।। नरानां क्षीण पापानां कृष्ण भक्ति प्रजायते ।। भाभवते । तावद् भयं द्रविण देह सुहृन्निमित्तं शोकस्पृहा परिभवो विपुलश्च लोभा । तावन्ममेत्य सदवग्रह आर्तिमूलं यावन्नतेऽघ्रिमभयं प्रवृणीत लोकः ।। चरितामृते । साधु शास्त्र कृपाय यदि कृष्णोन्मुख हय । सेइ जीव तारे माया ताहारे छाडय ।। ३९ ।।

When the fallen jiva-soul turns towards the Supreme, then again he will become free from all the miseries and his natural character will be obtained. ॥ 39 ॥

**ओं हरिः ॥ अन्तरंगोपलब्धिस्तत साम्मुख्यं ॥ हरिः ओं ॥ ४० ॥**

इति श्री आम्नायसूत्रे सम्बन्ध तत्व निरूपणे जीवतत्व प्रकरण समाप्तं ।

कठे । इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परंमनः । मनसश्च परा बुद्धि बुंद्धेरात्मा महान् परः ।। महतः परमव्यक्त मव्यक्तात् पुरूषः परः । पुरूषान्न परं किंचित् सा काष्ठा सा परा गतिः ।। एष सर्वेषु भूतेषु गुडात्मान प्रकाशते । दृश्यते त्वाग्रषा बुद्धचा सूक्ष्म दर्शिभिः ।। भागवते । आत्मतत्वावबोधेन वैराग्येन दमेन च । ईयते भगवानेभिः सुगुणो निर्गुणः सदृक् । विलक्षण स्थूल सूक्ष्माद्देहादात्मेक्षिता स्वदृक् । यथाग्निर्दारूणो दाह्या दाह कोन्यः प्रकाशकः ।। श्री जीवः । साम्मुख्यं द्विविधं निर्विशेषमयं सविशेषमयंच । तत्र पूर्वं ज्ञानं उत्तरन्तु द्विविधं अहंग्रहोपासनारूपं भक्तिरूपंच ।। चरितामृते । भ्रमिते भ्रमिते यदि साधु वैद्य पाय । ताँर उपदेशं मन्त्रे पिशाची पालाय ।। कृष्णभक्ति पाय तबे कृष्ण निकटे याय ।। ४० ।।

इति जीवतत्व प्रकरण भाष्यं समाप्तं

**श्री कृष्णचैतन्यार्पणमस्तु ।**

Transcendental realisation is obtained in the vicinity of the Supreme Lord. ॥ 40 ॥

---

## जीवगति प्रकरणं ।

**ओं हरिः ॥ संसार दशाश्चतस्रः ॥ हरिः ओं ॥ ४१ ॥**

बृहदारण्यके । तस्मिन् शुक्ल मूत नीलमाहुः पिंगलं हरितं लोहितंच एष पथा बाह्मणा हानुवृत्तः ।। भागवते । अदन्तिचैकं फलमस्य गृध्रा ग्रामे चरा एकमरण्य वासाः । हंसा य एकं बहुरूप मिज्येर्मायामयं वेद स देव वेदं ।। चैतन्य चरितामृते । ऐछे शास्त्र कहे कर्म ज्ञान योग त्यजि । भक्त्ये कृष्ण वश हन भक्त्ये तार भजि ।। ४१ ।।

The fallen jiva souls undergo four types of worldly phases. ॥ 41 ॥

**ओं हरिः ॥ अविद्यया कर्मदशा ॥ हरिः ओं ॥ ४२ ॥**

कठे । आशा प्रतीक्षे संगतं सूनृतांचेष्टापूर्ते पुत्र पशुंश्च सर्वान् एतद् बृंक्ते पुरूषस्याल्पमेधसो यस्यान्नश्नन् वसति ब्रह्मिणो गृहे ।। अत्रि स्मृतौ ।। इष्टापूर्तंच कर्तव्यं ब्राह्मणेनैव यत्नतः ।। इष्टेन लभ्यते स्वर्गं पूर्ते मोक्ष विधायते एतद्दशायां विंश धर्मशास्त्र विधियः । वेदान्त स्यमन्तके बीजांकुरादि वदनादि सिद्धं कर्मा तत् खलु अशुभं शुभंचेति द्विभेदं । वेदेन निषिद्धनरकस्यानिष्ट साधनं ब्रह्मण हननाद्यशुभं । तेन विहितं काम्यादितु शुभं । तत्र स्वर्गादीष्ट साधनं ज्योतिष्टोमादि काम्यं अकृते प्रत्यवाय जनकं सन्ध्योपासनोग्निहोत्रादि नित्यं । पुत्रजन्माद्यनु बन्धि जातेष्टयादि नैमित्तिकं दुरितक्षयकरं चान्द्रायणादि प्रायश्चित्तमिति शुभं बहुविधं ।। ४२ ।।

Deluded jiva-souls enter the phase of elevationism ॥ 42 ॥

**ओं हरिः ॥ विद्यया न्यास दशा ॥ हरिः ओं ॥ ४३ ॥**

सहोवाच मैत्रेयी येनाहं नामृतास्यां किमहं तेन कुर्यां ।। याज्ञवल्क्य स्मृतौ ।। सर्व भूतहितः शान्तस्त्रिदण्डी सकमण्डलुः एकवायः परिव्रज्य

भिक्षार्थी ग्राममाश्रयेत् ।। श्री शंकराचार्यः । तस्मादेते मन्त्रा आत्मनो याथात्म्य प्रकाशनेनात्म विषयं स्वाभाविक कर्मविज्ञानं निवर्तयन्तः शोकमोहादि संसारधर्मविच्छक्ति साधन मात्मैकत्वादि विज्ञान-मुत्पादयन्ति ।। ४३ ।।

By the inductive knowledge of the self, the jiva-soul enters the phase of abnegation. ॥ 43 ॥

ओं हरिः ॥ औदासीन्यान्निर्द्वन्द्वदशा ॥ हरिः ओं ॥ ४४ ॥

तलवकारे । नाहं मन्ये सुवेदेतिनान वेदेति वेदच । योनस्तद्वेद तद्वेद नोन वेदेति वेदच ।। श्रीमद् भगवद् गीतायां । नैव किंचित् करोमीति युक्तो मन्येत तत्ववित् । पश्यन् शृण्वन् जिघ्रन् नशन् गच्छन् स्वप्न स्वसन् । प्रलपन् विसृजन् गृह्णन् उन्मिषन्निमिषन्नापि ।। भागवते । आज्ञायैव गुणान् दोषान् मयादिष्टानपि स्वकान् ।। स लिंगानाश्रमां स्त्यक्त्वाचरेदविधिगोचरः ।। चैतन्य भागवते श्री मन्नित्यानन्दस्य औदासीन्य विषये । अहर्निश भावावेशे परम उद्दाम । सर्व नदीयाय बुले ज्योतिर्मय धाम ।। किवा योगी नित्यानन्द किवा तत्व ज्ञानी । यार येमत इच्छा ना बलये केनि ।। ४४ ।।

Indifference to the both of those phases is productive of an intermediary phase. ॥ 44 ॥

ओं हरिः ॥ भक्तौ सर्वत्रात्म भावदशा ॥ हरिः ओं ॥ ४५ ॥

ईशावास्ये । ईशावास्यमिदं सर्वं यत् किंच जगत्यां जगत् । तेन त्यक्तेन भुंजीथा मा गृध कस्यस्विद्धनं । कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयिनान्यथोऽतोऽस्ति न कर्म लिप्यते नरे ।। भागवते । यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्चयत् । योगेन दान धर्मेण श्रेयोभिरितरैरपि । सर्वं यद् भक्ति योगेन मद्भक्तो लभतेऽंजसा ।। श्री गौडपूर्णानन्दः । अयं प्रपंचः खलु सत्य भूतो मिथ्या न च श्रीपति संग्रहेण । शुद्धत्वमेतस्य निवेदनेन स्वर्णं यथा राजति धातुजातं ।। वैराग्य भोगाविति भक्तिमध्येस्थितावुदासीनतया खलु द्वौ । महाप्रसाद ग्रहणन्तु नित्यं भोगः कदाचित् खलु भक्तिरेव ।। ४५ ।।

At the appearance of Bhakti, the jiva-soul enters the phase of transcendental sentiments ॥ 45 ॥

**ओं हरिः ॥ विश्वौकसन्तु प्रायशः कर्मदशापन्नाः ॥ हरिः ओं ॥ ४६ ॥**

कठे । सत्वं प्रियान् प्रियरूपंश्च कामान्नभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैत्यं सृंकां वित्तमयीमवाप्तो यस्यां मज्जन्ति वहबो मनुष्याः ।। भागवते । लोके व्यवायामिष मद्यसेवा नित्याहि जन्तोर्नहि तत्र चोदना । व्यवस्थिति स्तेषु विवाह यज्ञ सुराग्रहैराप्त निवृत्तिरिष्टा ।। चरितामृते । धर्मचारी मध्ये बहुत कर्मनिष्ठ । कोटी कर्मनिष्ठ मध्ये एक ज्ञानी श्रेष्ठ ।। ४६ ।।

Jiva-souls inhabitating this universe are mostly involved in the phase of elevationism (Karma). ॥ 46 ॥

**ओं हरिः ॥ तेषां कदाचित् संसार गति विवेकः ॥ हरिः ओं ॥ ४७ ॥**

श्वेताश्वतरे । किं कारणं ब्रह्म कुतस्म जाताः जीवाम केन क्वच संप्रतिष्ठिताः । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्याम्।। ब्रह्मवैवर्ते । यावत् पापैस्तु मलिनं हृदयं तावदेवहि । न शास्त्रे सत्यबुद्धिस्यात् सम्बन्धः सद्गुरौतथा ।। अनेक जन्म जनित पुण्यराशि फलं महत् । सत्संगाच्छास्त्र श्रवणादेव प्रेमादि जायते ।। श्री सनातन गोस्वामी प्रश्न । के आमि केन आमाय जारे तापत्रय । इहा नाहि जानि केमने हित हय ।। ४७ ।।

Scarcely ever these jiva-souls may beget discretion about the course of worldly life. ॥ 47 ॥

**ओं हरिः ॥ मोचनोपाय जिज्ञासा च ॥हरिः ओं ॥ ४८ ॥**

मुण्डके । परीक्ष्य लोकान् कर्मचितान् ब्रह्मणो निर्वेद मायान्नस्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।। भागवते । दुःखोदर्केषु कामेषु जात निर्वेद आत्मवान् । अजिज्ञासित मद्धर्मो गुरूं मुनिमुपव्रजेत् ।। श्री निम्बादित्यस्वामि । उपास्यरूपं तदुपास्यकस्यच कृपालवो भक्तिवतस्ततः परं । विरोधिनोरूपमथैतदाप्तये ज्ञेया इमेऽर्था अपि पंच साधुभिः ।। ४८ ।।

The enquiry after means of securing release from the worldly bondage follows that discretion. ॥ ४८ ॥

ओं हरिः ॥ **असत् संग त्यागेन तत् फलोदयः** ॥ हरिः ओं ॥ ४९ ॥

तैत्तिरीये । यान्यस्माकं सूचरितानि तानि त्वयोपास्यानि नो इतरानि ।। कठे । नैषातर्केन मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।। भागवते । तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु । संगं न कुर्याच्छोच्येषु योषित् क्रीडा मृगेषु च ।। हरिभक्तिसुधोदये । यस्य यत्संगतिः पुंसो मणिवत् स्यात् सतद्गुणः । सकूलद्वैततो धीमान् स्वयूथ्यानेव संश्रयेत् ।। चरितामृते । असत्संग त्याग एइ वैष्णव आचार। स्त्रीसंगि एक असाधु कृष्णाभक्त आर ।। ४९ ।।

That honest enquiry will be fructuated if the evil companies are eschewed. ॥ 49 ॥

ओं हरिः ॥ **सत्संगाच्छास्त्राभिधेय जिज्ञासा** ॥ हरिः ओं ॥ ५० ॥

इति जीवगति प्रकरणं समाप्तं ।

इति श्रीमदाम्नायसूत्रे सम्बन्धतत्वं संपूर्णम् ।।

केनोपनिषदि । उपनिषदं भो ब्रूहि ।। भागवते । दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः । तत्रापि दुर्लभं मन्ये वैकुण्ठ प्रिय दर्शनं । अत आत्यन्तिकं क्षेमं पृच्छामो भवतोऽनघा । संसारेस्मिन् क्षणार्धोपि सत्संगः सेवधिर्नृणाम् ।। चरितामृते । भ्रमिते भ्रमिते यदि साधु वैद्य पाय । तार उपदेश मन्त्रे पिशाची पलाय ।। ५० ।।

इति सम्बन्धतत्व भाष्यं सम्पूर्णं । श्री कृष्ण चैतन्यार्पणमस्तु ।।

ॐ हरिः ।। शान्तिः शान्तिः शान्तिः ।। हरिः ॐ ।।

If the holy-company is availed, then the scriptural purport of means to the Supreme Reality will be interrogated. ॥ 50 ॥

---

## अभिधेय निर्णय प्रकरणं ।

**ओं हरिः ॥ नित्य कर्म ह्येवाभिधेयमित्येके ॥ हरिः ओं ॥ ५१ ॥**

मुण्डके । तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यं स्तानि त्रेतायां बहुधा सन्ततानि तान्याचरत्यनियतं सत्यकामा एष: व: पन्था: स्वकृतस्य लोके ।। गीतायां । नियतं कुरू कर्म त्वं कर्म ज्यायोह्यकर्मण: । शरीरयात्रापि च ते न प्रसिध्येदकर्मण: ।। तस्मादसक्त: सततं कार्यं कर्म समाचर । असक्तोह्याचरन् कर्म परमाप्नोति पुरूष: ।। चरितामृते । देहारामी कर्मनिष्ठ याज्ञिकादि जन । सत्संगे कर्म त्यजि करये भजन ।। ५१ ।।

Those who profess Karma-Mārga, say that the routine religious activities prescribed by the scriptures of Karma-Marga are the Means for securing the ultimate goal of life. ॥ 51 ॥

**ओं हरिः ॥ चिन्मात्राद्वैतज्ञानमभिधेयमित्यपरे ॥ हरिः ओं : ॥ ५२ ॥**

छान्दोग्ये । एतदात्ममिदं सर्वं तत्सत्यं स आत्मा तत्वमसि श्वेतकेतो ।। मुण्डके । कर्माणि विज्ञानमयंच आत्मा परेऽव्यये सर्व एको भवन्ति।। बृहदारण्यके । अयमात्मा ब्रह्म ।। छान्दोग्ये । एकमेवाद्वितीयम् ।। अहं ब्रह्मास्मि ।। ऐतरेये । प्रज्ञानं ब्रह्म नेह नानास्ति किंचन ।। अष्टावक्र संहितायां । कृमया क्व च संसार क्व प्रीति विरति: क्व वा । क्व जीव: क्व च तद् ब्रह्म सर्वदा विमनस्येमे ।। श्री विज्ञान भिक्षु: । आत्मैवास्ति परं सत्यं नान्या: संसार दृष्टय: । शुक्तिका रजतं यद्वत् यथा मरूमरीचिका ।। शंकराचार्य: । रज्जु सर्पवदात्मानं जीवो ज्ञात्वा भयं वहेत् । नाहं जीव: परात्मेति ज्ञानंचेन्निर्भयं भवेत् ।। अद्वैतं परमार्थत: इति गौडपाद: ।। ५२ ।।

Those others who say that the impersonal monistic knowledge of the self is the abhidheya or the Means, are known as Jnanis. ॥ 52 ॥

**ओं हरिः॥ यत्र धर्माय कर्म विरागाय धर्म श्चिद्रसाय विरागस्तत्र गौणरूपेण कर्मैवाभिधेयं॥ हरिः ओं॥ ५३॥**

ईशावास्ये। हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं। तत्व पूषन्नपावृणु सत्यधर्माय दृष्टये॥ भागवते। न यस्य कर्म धर्माय न विरागाय कल्पते। न तीर्थपाद सेवायै जीवन्नपि मृतोहि सः॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः अतएवात्म विनाशाय कल्पन्ते कल्पिताः परे॥ श्री रामानुजाचार्यः। उपाय बुद्ध्या कर्माणि मा कुरूध्वं महात्मकाः। कर्मणामेव कैंकर्ये प्राप्ते भगवतःमतिः॥५३॥

If the Karma is conducted for the piety, the piety is productive of abnegation from the secondary objects and when that abnegation is favouring the culture of transcendental Bliss, in that case the Karma may be accepted as a secondary Means towards securing the ultimate goal of life. ‖ 53 ‖

**ओं हरिः॥ यत्र चिद्रसाय ज्ञानं तत्र गौणरूपेण ज्ञानमभिधेयं॥ हरिः ओं॥ ५४॥**

बृहदारण्यके। तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्रह्मणः॥ भागवते। तस्मात् ज्ञानेन सहितं ज्ञात्वा स्वात्मान मुद्धव। ज्ञान विज्ञान सम्पन्नो भजमां भक्ति भावितः॥ श्री चरितामृते। भक्ति विना केवल ज्ञाने मुक्ति नाहि हय। भक्तिसाधन करे येइ प्राप्त ब्रह्मलय॥ जन्म हैते शुकसनकादि ब्रह्ममय। कृष्णगुणाकृष्ट हये कृष्णेरे भजय॥ ५४॥

When the knowledge of the self is favourable for the culture of transcendental Bliss, then it may be accepted as a secondary means. Karma and Jnāna (knowledge of the self) are never accepted as the primary Means (abhidheya). ‖ 54 ‖

**ओं हरिः॥ चिद्विशेष स्फूर्ति साधन मभिधेयमिति भाग्यवन्तः॥ हरिः ओं॥ ५५॥**

इति अभिधेय निर्णय प्रकरणं समाप्तम्।

प्रश्नोपनिशदि । तेषामसौ विरजो ब्रह्मलोको न येषु जिक्षममृत नमायाचेति ।। माठर श्रुतौ । भक्तिरेवैनं दर्शयति भक्तिवश: पुरूषो भक्तिरेव भूयसीति ।। भागवते । नैकात्मतां मे स्पृहयन्ति केचित् मत्पाद सेवाभिरता मदीहा: । येन्योन्यतो भागवता: प्रसज्य सभाजयन्ते मम पौरूषाणि । पश्यन्ति ते रूचिराण्यन्व सन्त: प्रसन्न वक्त्रारूण लोचनानि । रूपानि दिव्यानि वरप्रदानि साकं वाचं स्पृहनीयां वदन्ति ।। श्री भट्टनाथ: । नित्यमुक्तैक भोग्यं यत्तत् पंचोपनिषन्मयं । अप्राकृतं दिव्यरूपं अचक्षु विषयं गतं ।। ५५ ।।

इति अभिधेय निर्णय प्रकरण भाष्यं समाप्तं ।

Those who are fortunate among human beings know that, the performance-which works in blooming the realisation of the transcendental variegatedness,—itself is the Means. ॥ 55 ॥

---

## साधन प्रकरणम् ।

**ओं हरि: ॥ भाग्यवतां मत् प्रसंगादनन्य भक्तौ श्रद्धा ॥ हरि: ओं ॥ ५६ ॥**

छान्दोग्ये । अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेनमोपसीदतस्तु ऊर्ध्वं वक्ष्यामीति । यदा वै श्रद्धात्यथ मनुतोन श्रद्धन् मनुते श्रद्धधदेव मनुते श्रद्धात्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति ।। भागवते । सतां प्रसंगात् मम वीर्यं संबिदो भवन्ति हृत्कर्ण रसायना: कथा: । तज्जोषणादाष्वपवर्ग वर्त्मनि श्रद्धारति र्भक्तिरनु क्रमिष्यति ।। चरितामृते । साधुसंगे कृष्ण भक्त्ये श्रद्धायदि हय । भक्तिफल प्रेम हय संसार याय क्षय ।। श्रद्धावान जन हय भक्ति अधिकारी ।। ५६ ।।

In the holy company the fortunate souls acquire **firm** faith in the unalloyed devotion to the Supreme **Lord.** ॥ 56 ॥

**ओं हरिः ॥ सात्वन्योपायवर्जं भक्त्युन्मुखी चित्तवृत्ति विशेषः ॥ हरिः ओं ॥ ५७ ॥**

कठे । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ।। भागवते । आज्ञायैव गुणान् दोषान् मयादिष्टानपि स्वकान् धर्मान् सन्त्यज्य यः सर्वान् मां भजेत् स च सत्तमः ।। चरितामृते । पूर्व आज्ञा वेद कर्म धर्म योगज्ञान । सब साधि अवशेषे आज्ञा बलवान ।। एइ आज्ञाबले भक्त्ये श्रद्धा यदि हय । सर्व कर्म त्याग करि श्री कृष्ण भजय ।। श्रद्धा शब्दे विश्वास कहे सुदृढ निश्चय ।। ५७ ।।

That faith is a basic devotional faculty of the heart, which excludes the other secondary means like Karma and Jnāna ॥ 57 ॥

**ओं हरिः ॥ सा च शरणापत्ति लक्षणा ॥ हरिः ओं ॥ ५८ ॥**

श्वेताश्वतरे । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तंहि वेदं आत्मबुद्धि प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।। गीतायां । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।। वैष्णव तन्त्रे । आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं । रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा । आत्म॰ निक्षेप कार्पण्ये षड् विधा शरणागतिः ।। चरितामृते । शरण लञ्या करे कृष्णे आत्म समर्पण । कृष्ण ताँरे करे तत्काले आत्मसम ।। ५८ ।।

That faith is characterised by the sign of self–surrender ॥ 58 ॥

**ओं हरिः ॥ तया देशिक पादाश्रयः ॥ हरिः ओं ॥ ५९ ॥**

श्वेताश्वतरे। वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितं । नाप्रशान्ताय दातव्यं नापुत्राय शिष्याय वा पुनः ।। यस्य देवे परा भक्ति र्यथा देवे तथा गुरौ । तस्यैते कथिताह्यर्था प्रकाशन्ते महात्मनः ।। भागवते । नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्प गुरू कर्णधारं । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धि न तरेत् स आत्महा ।। चरितामृते । कोन भाग्ये कोन जीवेर श्रद्धा यदि हय । तबे सेइ जीव साधु संग करय ।।

गुरुपादाश्रय दीक्षा गुरूर सेवन। सद्धर्म पृच्छा साधु मार्गानु-गमन ।। ५९ ।।

That faith leads an aspirant to take shelter at the holy feet of the spiritual preceptor. ॥ 59 ॥

ओं हरिः ॥ ततः साधन भक्तिर्नवधा ॥ हरिः ओं ॥ ६० ॥

बृहदारण्यके । अत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निधि-ध्यासितव्यः ।। भागवते । श्रवणं कीर्तनंचास्य स्मरणं महतां गतेः । सेवेज्यावनतिर्दास्यं सख्यमात्म निवेदनं ।। चरितामृते । श्रवण कीर्तन स्मरण पूजन वन्दन । परिचर्या दास्य सख्य आत्मनिवेदन ।। ६० ।।

Shelter at the holy feet of the preceptor is followed by the nine-fold devotional performances. ॥ 60 ॥

ओं हरिः ।। भगवन्नाम रूपगुण लीला श्रवणम् ।। हरिः ओं ।। ६१ ।।

बृहदारण्यके । सहोवाच याज्ञवल्क्यः भवत्येतद् व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निधिध्यासस्वेति ।। भागवते । पिवन्ति ये भागवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं। पुनन्ति ते विषय विदूषिताशयं व्रजन्ति तच्चरण सरोरूहान्तिकम् ।। श्री जीवः । अथ क्रम प्राप्त श्रवणं । तच्च नाम रूप गुण लीलामय शब्दानां श्रोत्र स्पर्शः । प्रथमं नाम्नः श्रवणमन्तःकरण शुद्धयर्थ मपेक्षं । शुद्धे चान्तःकरणे रूप श्रवणेन तदुभय योग्यता भवति । सम्यगुदिते च रूपे गुणानां स्फुरणं सम्पाद्यते । नामरूपगुणेषु सम्यक् स्फुरितेष्वेव लीलानां स्फुरणं सुष्टु भवतीत्य-भिप्रेत्य साधन क्रमो लिखितं ।। ६९ ।।

Hearing about the Divine Name, Divine Form, Divine Attributes, Divine Sports etc., is an organ of Bhakti called as 'Shravanam' ॥ 61 ॥

ओं हरिः ।। तत्तत् कीर्तनम् ।। हरिः ओं ।। ६२ ।।

तैत्तिरीये । सामगायन्नास्ते ।। छान्दोग्ये । वाचं ब्रह्मेत्युपास्ते ।। भागवते । एतन्निर्विद्यमानानामिच्छता मकुतोभयं । योगिनां नृप निर्णीतं हरे र्नामानु कीर्तनं ।। इदं हि पुंसस्तपसः श्रुतस्यवा स्विष्टस्य सूक्तस्य

च बुद्ध दत्तयो:। अविच्युतोऽर्थः कविभिर्निरूपितं यदुत्तम: श्लोक गुणानुवर्णनं ।। श्री जीव: । यदि साक्षादेव महत् कृतस्य कीर्तनस्य श्रवण भाग्यं न संपद्यते तदैव स्वयं पृथक् कीर्तनमिति । गान शक्त्याभावे तत् शृणोति । तदनुमोदनं । बहुभिर्मिलित्वा कीर्तनं संकीर्तनं ।। ६२ ।।

Chanting and narrating about the Divine Name, Form, Attributes, Sports etc., are the organ of Bhakti called 'Kirtanam'. ‖ 62 ‖

ओं हरिः ॥ तत्तत् स्मरणम् ॥ हरिः ओं ॥ ६३ ॥

छान्दोग्ये । स्मरेण वै विजानाति स्मरमुपस्वेति स्मरं ब्रह्मेत्युपास्ते।। बृहन्नारदीये । विषयान् ध्यायतश्चित्तं विषयेषु विसज्जते । मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ।। श्री जीव: । तदिदं स्मरणं पंचविधं । यत् किंचिदनुसन्धानं स्मरणं । पूर्वतश्चित्तमाकृष्य साम्याकारेण मनोधारणं धारणा । विशेषतो रूपादि चिंतनं ध्यानं । अमृतधारावदनवच्छिन्नं तत् ध्रुवानुस्मृति: । ध्येय मात्र स्फुरणं समाधिरिति ।। ६३ ।।

Remembrance of the Name, Form, Attributes, Sports etc., is the third organ of the Nine-fold devotion, called as 'Smaranam' ‖ 63 ‖

ओं हरिः ॥ पादसेवनम् ॥ हरिः ओं ॥ ६४ ॥

कठे। मध्ये वामनमासीनं विश्वदेवा उपासते ।। भागवते। यत्पाद सेवाभिरूचिस्तपस्विनामशेष जन्मोपचितं मलं धिया । सद्य: क्षीणोत्यन्वसुमेधिता सति यथा पदांगुष्ठ विनि:सृता सरित् ।। श्री जीव: । सेवा च काल देशाद्युचिता परिचर्यादि पर्याया । सेव्यपादत्वेनैव प्रापस्य तस्य श्री पुरूषोत्तमस्य सच्चिदानन्द घनत्वमेवाभिप्रेतं । अत्र पादसेवायां श्रीमूर्ति दर्शन स्पर्शन परिक्रमानुव्रजन भगवन्मन्दिर गंगा पुरूषोत्तम द्वारका मथुरादि तदीय तीर्थस्थान गमनादयोप्यन्तर्भाव्या: ।। ६४ ।।

Serving the Feet of the Supreme Lord or 'Pada sevanam' is the fourth organ of Bhakti ‖ 64 ‖

ओं हरिः ॥ अर्चनम् ॥ हरिः ओं ॥ ६५ ॥

श्वेताश्वतरे । यो देवानामधिपो यस्मिँल्लोका अधिश्रिताः । य ईशेऽस्य द्विपद श्चतुष्पदः कस्मै देवाय हविषा विधेम ।। विष्णुधर्मे । देवतायांच मन्त्रे तथा मन्त्रपदे गुरौ । भक्तिरष्ट विधा यस्य तस्य कृष्णः प्रसीदति ।। गीतायां । पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतं अश्नामि प्रयतात्मनः ।। श्री जीवः । श्री नारदादि वर्त्मानुसारिभिः श्री भगवता सह सम्बन्ध विशेषं दीक्षाविधानेन श्री गुरू चरण सम्पादितं चिकीर्षद्भिः कृतायां दीक्षायां अर्चन मवश्यं क्रियते एव । येतु सम्पत्ति सन्तो गृहस्था स्तेषां त्वर्चन मार्ग एव मुख्यः । तदकृत्वाहि निष्किचनवत् केवल स्मरणादि निष्ठत्वे वित्तशाठ्य प्रतिप्रत्तिः स्यात् । तथा गार्हस्थ्य धर्मस्य देवता यागस्य शाखा पल्लवादि सेवक स्थानीयस्य मूल सेकरूपं तदर्चन मित्यपि तदकरणे महान् दोषः। क्वचिदत्र मानस पूजास्ति। अर्चनमपि द्विविधं। केवलं कर्ममिश्रञ्च पूर्वं निरपेक्षाणां श्रद्धावतां उत्तरं व्यवहार चेष्टातिशयवत्ता यादृच्छिक भक्त्यनुष्ठान लक्षण वर्तादि लक्षण लक्षित श्रद्धानां। आवाहनं चादरेण सम्मुखी करणं स्थापनं भक्त्या निषेवनं । सन्निधापनं तदीयत्व दर्शनं सन्निरोधनं क्रिया समाप्ति पर्यन्त स्थापनं । सकलीकरणं तत् सर्वांग प्रकाशनम् । अत्र शूद्रापि पूजितार्चा पूजा निषेध वचन मवैष्णव शूद्रादि परमेव ।। ६५ ।।

'Archanam' or worshipping the Supreme Lord is the fifth organ of Bhakti ॥ 65 ॥

**ओं हरिः ॥ भूतशुद्धि केशवन्यासावाहन वैष्णवचिह्नधृति निर्माल्य धारण चरणामृतपान व्रतपालनादीनि तदंगानि ॥ हरिः ओं ॥ ६६ ॥**

ईशावास्ये। युयोध्यस्मज्जुहुराणमेनो भूयिष्टां ते नमउक्तिं विधेम।। बह्व च परिशिष्टे। सहस्रारो नेमि नेमिना तप्ततनुः।। छान्दोग्य परिशिष्ठे। सहोवाच याज्ञवल्क्यस्तत् पुमानात्महितये प्रेम्ना हरिं भजेत् ।। वायुपुराणे । अयाचक प्रदाता स्यात् कृषिं वृत्यर्थमाचरेत् । पुराणः शृणुयान्नित्यं शालग्रामंच पूजयेत् ।। श्री जीवः । तत्र भूतशुद्धिः निजाभिलषित भगवत् सेवोपयिक तत् पार्षद देह भावना पर्यन्ता । अहंग्रहोपासनायाः शुद्धभक्तेर्दुष्टत्वात् । केशवविन्यासादीनां यत्राधमांगं विषयत्वं

तत्रतन्मूर्ति ध्यात्वा तत्तन्मन्त्रांश्च जप्त्वैव तत्तदंग स्पर्षमात्रं कुर्यात् । न तु तत्तन्मन्त्रदेवता तत्र तत्र न्यस्ता ध्यायेत् यानि चात्र वैष्णव वैष्णव-चिह्नानि निर्माल्य धारण चरणामृतपानादीनि अंगानि तेषांच पृथक् पृथक् महात्म वृन्दं शास्त्र सहस्रेष्वनुसन्धेयं । तथा श्री कृष्ण जन्माष्टमी कार्तिकव्रतैकादशीव्रतमाघस्नानादिकं अत्रैवान्त र्भाव्यं ।। ६६ ।।

Consecration of the articles, contemplating upon the Supreme Lord with sacred hymns, invocation, wearing the vaishnavite signs and the flowers offered to the Lord, drinking the Feet-wash, observing the austerities of Ekadashi etc, are the organs of worship. ॥ 66 ॥

ओं हरिः ॥ वन्दनं ॥ हरिः ओं ॥ ६७ ॥

श्वेताश्वतरे । त्वं स्त्रीत्वं पुमानसित्वं कुमार उतवा कुमारी । त्वं जीर्णोदन्देन वंचयसि त्वं जातो भवसि विश्वतोमुखः । नीलः पतंगो हरितो लोहिताक्ष स्तडिद्गर्भ ऋतवः समुद्राः । अनादिमस्त्वं विभुत्वेन यतोजातासि भुवनानि विश्वाः ।। नारायण व्यूहस्तवे । अहोभाग्य महोभाग्यं अहोभाग्यं नृणामिदं । येषां हरिपदाब्जाग्रे शिरोन्यस्तं यथा तथा ।। श्री जीवः । तच्च यद्यपि अष्टांगत्वेनापि वर्तते तथापि कीर्तन स्मरणवत् स्वातन्त्र्येनापीत्य प्रेत्य पृथक् विधीयते । एकहस्त कृतत्व वस्त्रावृत देहत्व भगवदग्रपृष्ट वामभागात्यन्त निकटगर्भमन्दिर गतत्वादि मायाऽपराधानमस्कारे परिहर्तव्याः ।। ६७ ।।

'Vandanam' or Salutation is the sixth organ of Bhakti. ॥ 67 ॥

ओं हरिः ॥ दास्यं ॥ हरिः ओं ॥ ६८ ॥

छान्दोग्ये । स सदावली भवत्यतोत्थाता भवति उत्तिष्ठन् परि-चारिता भवति परिचरन्नुपासत्ता भवत्युपसीदन्द्रष्टा भवति ।। भागवते । यस्मात् प्रियाप्रिय वियोग संयोग जन्म शोकाग्निना सकल योनिषु दह्यमानः ।। दुःखौषधं तदपि दुःखमतद्धियाऽहं भूमन् भ्रमामि वद मे तव दास्य योग्यं ।। श्री जीवः । तच्च श्री विष्णोर्दास्यमनत्वं । अस्तु तावत् भजन प्रयासः केवलं तादृशत्वाभिमानेनापि सिद्धिर्भवति ।।६८।।

'Dāsyam' or servitude is the seventh organ of Bhakti. ॥ 68 ॥

ओं हरिः ॥ सख्यं ॥ हरिः ओं ॥ ६९ ॥

श्वेताश्वतरे । न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैवं । हृदाहृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति ।। मुण्डके । द्वा सुपर्णा सयुजा सखाया इत्यादि ।। रामार्चन चन्द्रिकायां । परिचर्या परा केचित् प्रासादेषु च शेरते । मनुष्यमिव तं द्रष्टुं व्यवहर्तुंच वन्धुवत् ।। श्री जीवः । तच्च हित शासनमयं बन्धुभाव लक्षणम् ।। ६९ ।।

'Sakhyam' or Friendly attitude is the eighth organ of Bhakti. ॥ 69 ॥

ओं हरिः ॥ आत्मनिवेदनं ॥ हरिः ओं ॥ ७० ॥

इति श्री आम्नायसूत्रे अभिधेय निरूपणे साधन प्रकरणं समाप्तम् ।

बृहदारण्यके । स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा तद्यथा रथनाभौच रथानेमीचाराः सर्वे समर्पिता एवमे वास्मिन्नात्मनि सर्वाणि भूतानि सर्व एत आत्मनः समर्पिताः ।। भागवते । एवं सदा कर्म कलाप मात्मनः परेऽधियज्ञे भगवत्यधोक्षजे । सर्वात्मभावं विदधन्महीमिमां तन्निष्ठ विप्राभिहितः शशासह ।। श्री जीवः । तच्च देहादि शुद्धात्म पर्यन्तस्य सर्वतोभावेन तस्मिन्नेनार्पणं । तत्कार्यं चात्मार्थ-चेष्टाशून्यत्वं ।। तथा यामुन मुनिः । वपुरादिषु योपि कोपि वा गुणतोऽसानि यथा तथा विधः । तदयं भवतः पदाब्जयोरहमद्यैव मया समर्पिताः ।। ७० ।।

'Atma-nivedanam' or self-surrender is the ninth organ of Bhakti. ॥ 70 ॥

## साधन परिपाक प्रकरणं

**ओं हरिः ।। साधन प्रारंभे दशदोषा वर्जनीया ।। हरिः ओं ।। ७१ ।।**

कठे । नाविरतो दुश्चरितान्नाशान्तो न समाहितु: । नाशान्तो मनसोवापि प्रज्ञानेनैव माप्नुयात् ।। कात्यायन संहितायां । वरं हुतवह्-ज्वाला पंजरान्तर्व्यवस्थितिः । न शौरि चिन्ता विमुख जन संवासवैशसं ।। भागवते । शिष्यान्नैवानु बध्नीयाद् ग्रन्थान्नैवाभ्यसेद्बहून् । न व्याख्या-मुपयुंजीत नारंभानारभेत् क्वचित् ।। अलब्धे वा विनष्टे वा भक्षाच्छादन साधने । अविक्लव मतिर्भूत्वा हरिमेव धिया स्मरेत् ।। पाद्मे । शोकमर्षादिभिर्भावैराक्रांतं यस्य मानसं । कथं तस्य मुकुन्दस्य स्फूर्ति सम्भावना भवेत् ।। हरिरेव सदाराध्यः सर्वदेवेश्वरेश्वरः । इतरे ब्रह्म रूद्राद्या नावज्ञेया कदाचन ।। महाभारते । पितेव पुत्रं करूणो नो द्वे जयति योजनं । विशुद्धस्य हृषीकेश स्तूर्णं तस्य प्रसीदति ।। वाराहे । समार्चना-पराधा ये कीर्त्यन्ते वसुधे मया । वैष्णवेन सदातेतु वर्जनीयाः प्रयत्नतः ।। पाद्मे । नाम्नोहि सर्व सुहृदो ह्यपराधात् पतत्यधः ।। निन्दां भगवतः श्रृण्वंस्तत्परस्य जनस्य वा । ततो नो पैति यः सोऽपि यात्यधः सुकृताच्युतः ।। श्री रूपः । संगत्यागो विदूरेण भगवद्विमुखैर्जनैः । शिष्याद्यननु बन्धित्वं महारम्भाद्यनुद्यमः ।। बहुग्रन्थकलाभ्यास व्याख्या-वाद विवर्जनं । व्यवहारेप्यकार्पण्यं शोकाद्यवशवर्तिता । अन्यदेवानवज्ञाच भूतानुद्वेगदायिता । सेवानामापराधानां उद्भवा भावकारिता । कृष्ण तद्भक्ति विद्वेष विनिन्दाद्यसहिष्णुता । व्यतिरेकतयामीषां दशानां स्यादनुष्ठितः ।। ७१ ।।

Ten types of evil propensities must be eschewed at the beginning of the devotional performances. ॥ 71 ॥

**ओं हरिः ॥ तत्तु भक्त्यनुगत-दैन्यदयायुक्तवैराग्यैर्नतु निर्भेद ज्ञानानुगत साधन चतुष्टय योग कर्मभिः ॥ हरिः ओं ॥ ७२ ॥**

तैत्तिरीये । ब्रह्म ज्येष्ठ मुपासते । विज्ञानं ब्रह्मचेद्वेद तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्नणोहित्वा सर्वान् कामान् समश्नुते ।। भागवते दैन्यं । मैवं ममाधमस्यापि स्यादेवाच्युत दर्शनं । ह्रियमाणः कालनद्या

क्वचित्तरति कंचनः।। स्कान्दे दया। एतेन ह्यद्भुता व्याध तव हिंसादयो गुणाः। हरिभक्तौ प्रवृत्ता ये न ते स्युः परतापिनः।। युक्तवैराग्यं भागवते। वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानंच यदहैतुकं।। साधन चतुष्टय योग कर्म निषेध वचनं तत्रैव। न साधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता।। स्कान्दे। अन्तः शुद्धिर्वहिःशुद्धिस्तपः शान्त्यादयस्तथा। अमीगुणाः प्रपद्यन्ते हरिसेवाभिकामिनां।। श्री श्री मन्महाप्रभुः। तृणादपि सुनीचेन तरोरपि सहिष्णुना। अमानिना मानदेन कीर्तनीयः सदा हरिः।। ७२।।

The ten types of evil propensities can be renounced only by the practice of humbleness, kindness and balanced abnegation under the influence of Bhakti. The four-fold performances of the Monistic school or Yoga and Karma are not capable of relieving them. ॥ 72 ॥

**ओं हरिः॥ साधन परिपक्वे सर्वानर्थ निवृत्तिः।। हरिः ओं॥ ७३॥**

छान्दोग्ये। आहार शुद्धौ सत्व शुद्धिः सत्व शुद्धौ ध्रुवास्मृतिः स्मृतिलभ्ये सर्वग्रन्थीनां विप्र मोक्षस्तस्मै मृदित कषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः।। भागवते। शुश्रूषो श्रद्धधानस्य वासुदेव कथा रूचिः। स्यान्महत् सेवया विप्राः पुण्यतीर्थ निषेणात्।। श्रृण्वतां स्वकथाः कृष्णः पुण्यश्रवण कीर्तनः। हृद्यन्तस्थोह्यभद्राणि विधुनोति सुहृत् सतां।। नष्टप्रायेष्वभद्रेषु नित्यं भागवत सेवया। भगवत्युत्तमः श्लोके भक्तिर्भवति नैष्ठिकी।। तदा रजस्तमो भावाः काम लोभादयश्चये। चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति।। भिद्यते हृदय ग्रन्थि श्छिद्यन्ते सर्व संशयाः। क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे।। चरितामृते। साधु संग हैते हय श्रवण कीर्तन। साधन भक्त्ये हय सर्वानर्थ निवर्तन।। ७३।।

Along with the maturity of the devotional performances, all the evil obstacles get disappeared. ॥ 73 ॥

**ओं हरिः ॥ स्वरूपानावाप्त्यसत्तृष्णापराध हृदयदौर्बल्यानीत्यनर्थश्च चतुर्विधः ॥ हरिः ओं ॥ ७४ ॥**

स्वरूपानावाप्ति यथा श्वेताश्वतरे। स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः।। असत्तृष्णा यथा बृहदारण्यके। येषां नोय मात्माऽयं लोक इति तेऽस्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्था याथ भिक्षाचर्यं चरन्ति ।। अपराधी यथा ईशावास्ये । असूर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रत्यभिगच्छन्ति ये के चात्महनो जनाः ।। हृदय दौर्बल्यं कठे । पराच कामाननुयंन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशं ।। भागवते। किं व्यवहितापत्यदारागार धनादयः। राज्यकोशगजामात्यः भृत्याप्ता ममतास्पदाः। किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः। अनर्थैरर्थ संकाशैर्नित्यानन्द महोदधे।। चरितामृते । ज्ञाने जीवन्मुक्त दशा पाइनु करि माने । वस्तुत बुद्धिशुद्ध नहे कृष्ण भक्ति विने ।। काम त्यजि कृष्ण भजे शास्त्र आज्ञामानि । सेवा नामापराधादि दूरेते वर्जन ।। ७४ ।।

Mis-identification of the self, attachment for the transitory objects, offences and weakness against temptations—these are the four types of evil acquaintances (anartha) inherent in the heart of the fallen souls. ॥ 74 ॥

**ओं हरिः ॥ साधन योगेनाचार्य प्रसादेनच तूर्ण तदपनयनमेव भजन नैपुण्यं ॥ हरिः ओं ॥ ७५ ॥**

इति साधन परिपाक प्रकरणं समाप्तं ।

प्रश्नोपनिषदि। तस्मै सहोवाचाति प्रश्नान् पृच्छसि ब्रह्मिष्ठोसीति तस्मात्तेहं ब्रवीमि । ते तमर्चयन्तस्तं हि नः पिता योऽस्माक मविद्यायाः परं पारं तारयसीति। नमः परम ऋषिभ्यो नमः परम ऋषिभ्यः ।। भागवते। गुरू शुश्रूषया भक्त्या सर्व लाभार्पणेन च। संगेन साधु भक्ताना मीश्वराराधनेन च ।। यथाग्निना हेममलं जहाति ध्मातं पुनःस्वं भजते स्वरूपं। आत्माच कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथोमां ।। यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्य गाथा श्रवणाभिधानैः। तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवांजन संप्रयुक्तम् ।। चरितामृते । साधु संगे तबे कृष्णे रति उपजय । गुरू अन्तर्यामी रूपे शिखाय आपने ।। ७५ ।।

इति साधन परिपाक प्रकरण भाष्यं समाप्तं ।।

A skillful aspirant after Bhakti gets away with these four fold anarthas by the help of devotional performances and by the grace of the preceptor. ॥ 75 ॥

---

## भजनक्रम प्रकरणम् ।

ओं हरिः ॥ ततो भजननिष्ठा ॥ हरिः ओं ॥ ७६ ॥

छान्दोग्ये । यदा वै निस्तिष्ठत्यथ श्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठात्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति ।। भागवते। एतां समास्थाय परात्मनिष्ठां अध्यासितां पूर्वतमैः महर्षिभिः । अहं तरिष्यामि दुरन्तपारं तमो मुकुन्दांघ्रि निषेवयैव ।। श्री ठाकुर नरोत्तमः। अन्याभिलाष छाडि, ज्ञान कर्म परिहरि, कायमने करिव भजन । साधु संगे कृष्ण सेवा, ना पूजिवो देवी देवा, एइ भक्ति परम कारण ।। श्री कविराज मिश्रः । दिशतु स्वराज्यं वा विरतु तापत्रयं वापि ।। सुखितं दुःखित मपि मां न मुंचतु केशव स्वामी ।। ७६ ।।

Skill in the devotional services generates firm faith. ॥ 76 ॥

ओं हरिः ।। रूचिस्ततः ॥ हरिः ओं ।। ७७ ।।

छान्दोग्ये । यदो वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृति भगवो विजिज्ञास इति ।। भागवते । तत्रान्वहं कृष्णकथा प्रगायता मनुग्रहेणाहु नवं मनोहराः । ताः श्रद्धयामेऽनुपदं विश्रृण्वतः प्रियश्रवस्यांग ममाभवद्रतिः ।। रतिरत्र रूचिरिति श्री जीवः ।। श्री सार्वभौम भट्टाचार्यः । लावण्यामृत-वन्या मधुरिम लहरी परीपाकः । कारूण्यानां हृदयं कपोट किशोरः परिस्फुरतु ।। भवन्तु तत्रजन्मानि यत्र ते मुरलीकलः । कर्णपेयत्वमायाति किं मे निर्वाण वार्तया ।। श्री यादवेन्द्रपुरी। रसं प्रशंसन्तु कवित्वनिष्ठा ब्रह्मामृतं वेदशिरो निविष्टाः । वयन्तु गुंजा कलितावतंसं गृहीत वंश कमपि श्रयामः ।। ७७ ।।

Further increase in the devotional skill generates a great relish in the heart of the aspirant. ॥ 77 ॥

ओं हरिः ॥ ततः आसक्तिः ॥ हरिः ओं ॥ ७८ ॥

छान्दोग्ये । यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति ।। भागवते । नामान्यनन्तस्य हतत्रपः पठन् गुह्यानि भद्रानि कृतानिच स्मरन् । गां पर्यटन् तुष्टमना गतस्पृहः कालं प्रतीक्षन्नमदो विमत्सरः ।। एवं कृष्णमतेः ब्रह्मन्नासक्तस्यामलात्मनः । कालः प्रादुरभूत् काले तडित् सौदामिनी यथा ।। श्री हरिदासः । अलं त्रिदिव वार्तया किमिति सार्वभौमश्रिया विदूरतरवर्तिनी भवतु मोक्षलक्ष्मीरपि । कलिन्द गिरिनन्दिनी तटनिकुंज पुंजोदरे मनोहरति केवलं नवतमालनीलं महः ।। श्री रघुपति उपाध्यायः। कंप्रति कथयितुमीशे संप्रति को वा प्रतीतिमायाति । गोपतितनयाकुंजे गोपवधूटी बिटं ब्रह्म ।। चरितामृते । रूचि हैते हय तवे आसक्ति प्रचुर ।। ७८ ।।

In due course of time the relish turns to be the firm attachment. ॥ 78 ॥

ओं हरिः ॥ ततो भावः ॥ हरिः ओं ॥ ७९ ॥

इति श्री आम्नायसूत्रे अभिधेय तत्व निरूपणे भजन क्रम प्रकरणं समाप्तं ।

इति श्री आम्नायसूत्रे अभिधेय तत्वं समाप्तं ।
श्री कृष्ण चैयन्यार्पणमस्तु ।।

छान्दोग्ये । यावै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमात्वेव विजिज्ञासितव्य इति ।। श्वेताश्वतरे । भावग्राह्य मनोजाख्यं भावा भावकरं शिवं । कलासर्गकरं देवं ये विदुस्ते जहुस्तनूं ।। भागवते । क्वचिद्रुदन्त्यच्युत चिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः । नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ।। चरितामृते । आसक्ति हइते चित्ते जन्मे रतिर अंकुर ।। केचित् वैष्णव वाक्ये । परिवदतु जनो यथातथायं ननु मुखरो नवयं विचार यामः ।

हरि रस मदिरा मदाति मत्तो भुवि विलुठाम नटाम निर्विशामः ।। कविरत्न । जातु प्रार्थयते न पार्थिव पदं नैन्द्रपदे मोदते सन्धत्ते न च योग सिद्धि युधियं मोक्षं नचाकांक्षति । कालिन्दी वनसीमनि स्थिर तडिन्मेघद्युतौ केवलं शुद्धे ब्रह्मणि वल्लवी भुजलताबन्धे मनो धावति ।। श्रीधरस्वामी । तत् कथामृत पाथोधौ विहरन्तो महामुदः । कुर्वन्ति कृतिनः केचित् चतुर्वर्गं तृणोपमं । श्री गोविन्द मिश्रः । श्रवणे मथुरा नयने मथुरा वदने मथुरा हृदये मथुरा । पुरतो मथुरा परतो मथुरा मधुरा मधुरा मथुरा मथुरा ।। श्री रूपः । क्षान्ति रव्यर्थ कालत्वं विरक्ति-र्मानशून्यता । आशाबन्धः समुत्कण्ठा नामगाने सदा रूचिः । आसक्तिस्तद् गुणाख्याने प्रीतिस्तद् वसति स्थले । इत्यादयोऽनुभावाः स्युर्जात भावांकुरे जने ।। ७९ ।।

इति भजनक्रम प्रकरण भाष्यं समाप्तं ।

The firm attachment in Bhakti gradually turns into the state of transcendental sentiments (Bhāva). Upto the acquirement of Bhāva, the performance is called as Sādhana Bhakti ‖ 79 ‖

---

## प्रयोजन तत्वं ।

## प्रयोजन निर्णय प्रकरणं

**ओं हरिः ।। अविद्या कल्पित जडविशेषो न प्रयोजनं ।। हरिः ओं : ।। ८० ।।**

छान्दोग्ये । गो अश्व मिहमहिमेत्याचक्षते हस्ति हिरण्यं दासभार्यं क्षेत्रान्यायतनानीति नाहमेवं ब्रवीमिहहो बाचाम्योऽन्यस्मिन् प्रतिष्ठित इति ।। भागवते । स सर्व धीवृत्त्यनुभूत सर्व आत्मा यथा स्वप्न जनेक्षितैकः । तं सत्यमानन्द निधिं भजेत नान्यत्र सज्जेत यत आत्मपातः ।। श्री जीवः । अथ जीवस्तदीयापि तज् ज्ञान संसर्गाभावयुक्तत्वेन तन्माया पराभूतः सन्नात्म स्वरूप ज्ञान लोपात् माया कल्पितोपाध्यावेशाच्च अनादि संसार दुःखेन संवध्यते ।। ८० ।।

Since the mundane specialities like heaven etc., are the product of nescience, they are not the goal to be coveted by the jiva-souls. ‖ 80 ‖

**ओं हरिः ॥ नापि निर्विशेषः ॥ हरिः ओं ॥ ८१ ॥**

छान्दोग्ये । अमुस्मादाकाशात् समुत्थाय परं ज्योति रूप सम्पद्य स्वेन रूपेणाभिनिष्पद्यते ।। श्वेताश्वतरे । तमेव विदित्वाति मृत्यु मेति ।। भागवते । दुरवगमात्मतत्व निगमाय तवात्त तनोश्चरित महामृताब्धि परिवर्त परिश्रमणाः । न परिलसन्ति केचिदपवर्ग मपीश्वरते चरण-सरोजहंस कलसंग विसृष्ट गृहाः ।। श्री गौडपूर्णानन्दः । तत् पदार्थः प्रकटपरमानन्द पूर्णामृताब्धिस्तं शब्दार्थो भव भय भर व्यग्रचित्तोति दुःखी । तस्मादैक्यं नभवतितयो भिन्नयो वस्तुगत्या भेदः सेव्यः स खलु जगतां त्वं हि दासस्तदीयः ।। यस्मिन्नुत्पत्तिमायात् त्रिभुनसहितं चन्द्र-सूर्यादि सर्वं यस्मिन्नाशान्त मास्ते व्रजति विलयं स्व स्व कालेन यस्मिन् । वेदै ब्रह्मापि वक्तुं प्रभवति न कदा यं गुणातीतमीशं सोऽहं वाक्यन्तु कस्मादुपदिशसि गुरोर्मन्दभाग्याय मह्यं ।। ८१ ।।

Attaining the state of non-distinction also is not the summum bonum of life. ॥ 81 ॥

**ओं हरिः ॥ परमार्थे तस्य न प्रयोजनत्वं किन्तु क्वचिदभिधेयत्वं ॥ हरिः ओं ॥ ८२ ॥**

क्वचिदभिधेयत्वं ईशावास्ये । यस्मिन् सर्वाणि भूतान्यात्मैवा भूद्विजानतः । तत्र को मोहः कः शोक एकत्व मनुपश्यतः ।। छान्दोग्ये । तत्वमसि श्वेतकेतो ।। श्री गोपाल तापन्यां । सोऽहमित्येवधार्यात्मनं गोपालोऽहमिति भावयेत् ।। नृसिंहोपनिषदि । परे ब्रह्मणि पर्यवसितो भवेत् ।। न प्रयोजनत्वं भागवते । ज्ञाने प्रयास मुदपास्य नमन्त एव जीवन्ति सन्मुखरितां भवदीयवार्तां स्थाने स्थितां श्रुतिगतां तनुवाङ मनोभिर्ये प्रायशोऽजित जितोप्यसि तैस्त्रिलोक्यां ।। महाप्रभु । तत्वमसि जीव हेतु प्रादेशिक वाक्य । प्रणव ना मानि तारे कहे महावाक्य ।।८२।।

States of phenomenal distinction and non-distinction have nothing to do with the spiritual matters but, occasionally they may serve as the means. ॥ 82 ॥

(see aphorisms 53 & 54)

**ओं हरिः ॥ तत्तु सर्वत्र न प्रशस्तं ॥ हरिः ओं ॥ ८३ ॥**

ईशावास्ये । अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो यउ विद्यायां रताः ।। भागवते । श्रेयः सृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति केवल बोधलब्धये । तेषामसौ क्लेशल एव शिष्यते नान्यद् यथा स्थूलतुषावघातिनां ।। येन्येऽरविन्दाक्ष विमुक्तमानिन स्त्वय्य स्वभावा दविशुद्ध बुद्धयः । आरूह्यकृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृत युष्मदंघ्रयः ।। चरिताभृते । ज्ञानी जीनन्मुक्त दशा पाइनु करि माने । वस्तुत बुद्धि शुद्ध नहे कृष्ण भक्ति विने ।। ८३ ।।

But, they are not commendable in every case. ॥ 83 ॥

**ओं हरिः ॥ चिद्विशेष एव प्रयोजनं ॥ हरिः ओं ॥ ८४ ॥**

इति प्रयोजन निर्णय प्रकरणं समाप्तं ।

छान्दोग्ये । ब्रूयाद्यावान् वा अयमाकाशस्तवा नेषान्तहृदये आकाश उभेऽस्मिन् द्यावा पृथिवी अन्तरेव ममाहिते उभावग्निश्च वायुश्च सूर्य-चन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहित मिति ।। ब्रह्म संहितायां । चिन्तामणि प्रकर सद्म सुकल्प वृक्ष लक्षावृतेषु सुरभी रभिपालयन्तं । लक्ष्मी सहस्रशत संभ्रम सेव्यमानं गोविन्दमादि पुरूषं तमहं भजामि ।। चरितामृते । स्वयं भगवान् कृष्ण गोविन्द पर नाम । सर्वैश्वर्य पूर्ण याँर गोलोक नित्य धाम ।। ८४ ।।

इति प्रयोजन निर्णय प्रकरण भाष्यं समाप्तं ।

Transcendental variegatedness is the final attainment of the jiva-souls. ॥ 84 ॥

---

## स्थायी भाव प्रकरणं ।

**ओं हरिः ॥ विशिष्ट भावो हि रतिः ॥ हरिः ओं ॥ ८५ ॥**

छान्दोग्ये । आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान् एवं विजानन् आत्मरति मात्मक्रीड आत्म मिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु कामोचारो भवति ।। गीतायां । यस्त्वात्म रति रेव

स्यात् आत्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ।। अग्निपुराणें। अभिमानाद्रतिः साच परिपोष मुपेयुषी। व्यभिचार्यादि सामान्यात् श्रृंगार इति गीयते ।। श्री रूप। शुद्धसत्व विशेषात्मा प्रेम सूर्यांशु साम्यभाक्। रुचिभिश्चित्तमासृण्य कृदसौ भाव उच्यते ।। आविर्भूय मनोवृत्तौ व्रजन्ति तत् स्वरूपतां। स्वयं प्रकाश रूपपि भासमाना प्रकाश्यवत् ।। ८५ ।।

Transcendental sentiment arised in the heart is called as "Rati". ॥ 85 ॥

**ओं हरिः ॥ उल्लासमयीतरराग शून्या रतिः प्रीतिः ॥ हरिः ओं ॥ ८६ ॥**

तैत्तिरीये।आनन्दो ब्रह्मेति व्यजनात्। अनन्दाद्धेव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति ।। विष्णुपुराणे। नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहं। तेषु तेष्वच्युता भक्तिरच्युतेस्तु सदा त्वयि ।। या प्रीति रविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सामे हृदयन्नापसर्पतु ।। चरितामृते। सेइ रति गाढ हइले धरे प्रेम नाम। सेइ प्रेमा प्रयोजन सर्वानन्द धाम ।। ८६ ।।

When the 'Rati' or sentiments become hilarious and un-alloyed, then it is denoted as "Priti" ॥ 86 ॥

**ओं हरिः ।। दृढ ममतातिशयात्मिका प्रीतिः प्रेमा ।। हरिः ओं ।। ८७ ।।**

कठे। नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्य स्तस्यैष आत्मा विवृणुते तनुं स्वां ।। गोपालोपनिषदि। एतद्विष्णोःपरमं पदं ये नित्ययुक्ताः संयुजन्ते न कामान्। तेषामसौ गोपरूपः प्रकशयेदात्मपदं तदैव ।। पंचरात्रे। अनन्य ममता विष्णो ममता प्रेम संगता। भक्तिरित्युच्यते भीष्म प्रह्लादोद्धव नारदैः।। श्री रूपः। सम्यङ्मसृणित स्वान्तो ममत्वातिशयांकितः।। भावः स एव सान्द्रात्मा बुधैः प्रेम निगद्यते ।। ८७ ।।

When the 'Priti' is endowed with extreme affection, it is termed as "Prema". ॥ 87 ॥

ओं हरिः ॥ विश्रम्भात्म प्रेमा प्रणयः ॥ हरिः ओं ॥ ८८ ॥

तैत्तिरीये। यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने अभयं प्रतिष्ठां विन्दते। अथसोऽभयं गतोभवति ॥ भागवते। उवाह कृष्णो भगवान् श्रीदामानं पराजितः ॥ श्री रूपः। प्राप्तायां सम्भ्रमादीनां योग्यतायामपि स्फुटं। तद् गन्धेनाप्यसंस्पृष्टा रतिः प्रणय उच्यते ॥ ८८ ॥

When the 'Prema' is associated with resolute confidence, it is called as "Pranaya". ॥ 88 ॥

ओं हरिः ॥ कौटिल्याभासात्मक भाववैचित्रानुगुण प्रणयो मानः ॥ हरिः ओं ॥ ८९ ॥

तैत्तिरीये। तन्मन इत्युपासीत। मानवान् भवति ॥ भागवते। क्वचिद् भ्रूकुटिमावध्य प्रेमसंरम्भविह्वला ॥ श्री रूपः। अहेरिवगतिः प्रेम्नः स्वभावकुटिलाभवेत्। अतो हेतोरहेतोश्च युनोर्मान उदंचति ॥ ८९ ॥

When the 'Pranaya' is coloured with the semblance of deplomacy, that 'sentimental diversity' is known as "Māna". ॥ 89 ॥

ओं हरिः ॥ चेतो द्रवातिशयात्मक प्रेमैव स्नेहः ॥ हरिः ओं ॥ ९० ॥

बृहदारण्यके। तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मादनन्तरतरं यदयमात्मा॥ भागवते। वीक्ष्यन्तः स्नेह सम्बन्धा विचेलुस्तत्र तत्रह॥ न्यरून्धन्नुद्गलद्वाष्प मौत्कण्ठाद्देवकीसुते। निर्यात्यगारान्नोभद्रमिति स्याद्वान्धव स्त्रियः॥ चरितामृते। काँदिया कहेन शची बाछारे निमाई। विश्वरूप सम ना करिह निठुराइ ॥ सन्यासी हैया मोरे ना दिल दरशन। तुमि तैछे हैले मोर हइवे मरण ॥ ९० ॥

The 'Prema' associated with the extreme liquidity of heart is known as "Sneha". ॥ 90 ॥

**ओं हरिः ॥ अभिलाषात्मकः स्नेह एव रागः ॥ हरिः ओं ॥ ९१ ॥**

बृहदारण्यके । आत्मानं चेद्विजानीयादयमस्मीति पुरुषः ।। किमिच्छन् कस्यकामाय शरीरमनुसंचरेत् ।। भागवते । विपदः सन्तुताः शश्वत्तत्र तत्र जगद्गुरो । भवतो दर्शनं यत् स्यादपुनर्भव दर्शनं ।। चरितामृते । नीलाचले नवद्वीपे येन दुइ घर । लोक गतागति वार्ता पाव निरन्तर ।। तुमि सब करिते पार गमनागमन । गंगास्नाने कभु ताँर हवे आगमन ।। आपनार दुःख सुख ताहा नाहि गणि । तार येइ सुख ताहा निज सुख मानि ।। ९१ ।।

The nature of 'Sneha' when becomes intensely covetous, it is called as "Raga". ॥ 91 ॥

**ओं हरिः ॥ रागोऽनुक्षणं पिषयाश्रययोर्नवीनत्वं संपादयन्ननुरागः ॥ हरिः ओं ॥ ९२ ॥**

तैत्तिरीये । एतमानन्दमयमात्मानमुपसंक्रम्य इमाँल्लोकान् कामाशी कामरूप्यनुसंचरन् एतत् सामगायन्नास्ते । हाऽबु हाऽबु हाऽबु ।। भागवते । यद्यप्यसौ पार्श्वगतो रहो गतस्तथापि तस्यांघ्रियुगं नवं नवं । पदे पदे का विरमेत तत्पदा चलापि यं श्रीर्न जहाति कर्हिचित् ।। श्री वासुदेव घोषः । ना जानिया ना शुनिया प्रीति करिलाम गो परिणामे परमाद देखि ।। आषाढ श्रावण मासे घन देया वरिखये एमति झरय दुटि आँखि ।। हेर ये आमारे देख, मानुष आकार गो, मनेर अनले आमि पुडि ।। ज्वलन्त अनले येन पुडिया रैयाछिगो पाकालिया पाटेर डूँरि ।। आन्धुया पुरूखे येन, दीन हीन मीन हेन, निश्वास छाडिते नाहि ठाँइ । वासुदेव घोष कहे डाकाति पिरित गो तिले तिले वन्धुरे हाराइ । ९२।।

The 'Raga' which perpetually generates ever new freshness between it's object and the shelter, is termed as "Anuraga" ॥ 92 ॥

**ओं हरिः ॥ असमोर्ध्वे चमत्कारेणोन्मादनं महाभावः ॥ हरिः ओं ॥९३॥**

इति स्थायीभाव प्रकरणं समाप्तं ॥

मुण्डके । यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नाम रूपे विहाय । तथा विद्वान् नाम रूपाद्विमुक्तः परात्परं पुरूषमुपैति दिव्यं ॥ भागवते । गोपीनां परमानन्द आसीद् गोविन्द दर्शने । क्षणं युगशतमिव यासां येन विना भवेत् ।। श्री रूपः । इयमेव रतिः प्रौढा महाभाव दशां व्रजेत् । या मृग्यास्याद्विमुक्तानां भक्तानांच वरीयसां ॥ ९३ ॥

इति स्थायी भाव प्रकरण भाष्यं समाप्तम् ॥

The 'Anurāga' intoxicated with Unprecedented excellence is called as "Mahābhāva". ॥ 93 ॥

---

## रसप्रकरणं

**ओं हरिः ॥ सामग्री परिपुष्टा रतिरेव रसः ॥ हरिः ओं ॥ ९४ ॥**

तैत्तिरीये । रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति ॥ अग्निपुराणे । न भावहीनोऽस्ति रसो न भावो रस वर्जितः । भावयन्ति रसा नेभिर्भाव्यन्ते च रसा इति ॥ श्री भरत मुनिः । शक्तिरस्ति विभावादेः कापि साधारणी कृतौ। प्रमाता तदभेदेन स्वयं यया प्रतिपद्यते।। चरितामृते । एइ सब कृष्ण भक्ति रस स्थायी भाव । स्थायी भावे मिले यदि विभावानुभाव ॥ सात्विक व्यभिचारी भावेर मिलने । कृष्णभक्ति रस हय अमृत आस्वादने ॥ यैछे दधि सिता घृत मरीच कर्पूर। मिलने रसाल हय अमृत मधुर ॥ ९४ ॥

When the permanent sentiment or Rati is fortified with four types of Sāmagri or ingredients, it becomes "Ṛasa" or the transcendental mellowy deliciousness. ॥ 94 ॥

**ओं हरिः ॥ स च पंचविधो मुख्यः सप्तविधो गौणः ॥ हरिः ओं ॥९५॥**

बृहदारण्यके। यस्मिन् पंच पंच जना आकाशश्च प्रतिष्ठितः। तमेव मन्ये आत्मानं विद्वानु ब्रह्मामृतोऽमृतं ।। वाराहे । पुत्र भ्रातृसखित्वेन स्वामित्वेन यतो हरिः । वहुधा गीयते वेदैर्जीयांशस्तस्य ते ननु ।। चरितामृते । रतिभेदे कृष्ण भक्ति रस पंच भेद ।। ९५ ।।

Primary Rasas are of five types and the Secondary ones are of seven. ॥ 95 ॥

**ओं हरिः ॥ शान्त रसः ॥ हरिः ओं ॥ ९६ ॥**

छान्दोग्ये । सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।। भागवते । ऋषयो वातरसना श्रमणा ऊर्ध्वमन्थिनः । ब्रह्माख्यं धाम ते यान्ति शान्ताः सन्यासिनोऽमलाः।। चरितामृते। शान्त भक्त नव योगेन्द्र सनकादि आर ।। शान्तरसे शान्ति रति प्रेम पर्यन्त हय ।। शान्त रसे स्वरूप बुद्धये कृष्णैक निष्ठता ।। कृष्ण निष्ठा तृष्णा त्याग शान्तेर दुइ गुणे । एइ दुइ गुण व्यापे सर्व भक्तजने ।। आकाशेर शब्दगुण येन भूतगणे ।। शान्तेर स्वभाव कृष्णे ममता गंध हीन । परं ब्रह्म परमात्मा ज्ञान प्रवीण ।। ९६ ।।

The first Primary Rasa is known as 'Shanta Rasa'. ॥ 96 ॥

**ओं हरिः ॥ दास्य रसः ॥ हरिः ओं ॥ ९७ ॥**

अग्निवेश्म श्रुतिः । अंशोह्येष परस्य भिन्नं ह्येन मधीयिरे । ब्रह्म दासा ब्रह्म कितवा इति ।। भागवते । किं चित्रमच्युत तवैतदशेषबन्धो दासेष्वनन्य शरणेषु यदात्मसात्त्वं यो रोचयेत् सहमृगैः स्वयमीश्वराणां श्रीमत् किरीटतट पीडित पादपीठः।। त्वयोपभुक्त स्रग्गन्ध वासोऽलंकार-चर्चिताः । उच्छिष्ट भोजिनो दासास्तव मायां जयेमहि ।। चरितामृते । दास्य भक्त सर्वत्र सेवक अपार ।। केवल स्वरूप ज्ञान हय शान्त रसे । पूर्णैश्वर्य प्रभुर ज्ञान अधिक हय दास्ये ।। ईश्वर ज्ञान सम्भ्रम गौरव प्रचुर। शान्तेर गुण दास्ये आछे अधिक सेवन।। दास्य रति राग पर्यन्त क्रमेते बाडय ।। ९७ ।।

The second Primary-Rasa is "Dāsya Rasa". ॥ 97 ॥

### ओं हरिः ॥ सख्य रसः ॥हरिः ओं ॥ ९८ ॥

मुण्डके । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।। भागवते । अहोति रम्यं पुलिनं वयस्याः स्वकेलि सम्पन्मृदुला च्च बालुकं । स्फुटं सरोगन्धहृतानि पत्रिकध्वनि प्रतिध्वनि लसद् द्रुमाकुलं ।। अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः । वत्साः समीपेऽपःपीत्वा चरन्तु शनकैस्तृणं ।। वाल्मीकि रामायणे । सोहं प्रियसखं रामं शयानं सह सीतया । रक्षिष्यामि धनुष्पाणिः सर्वथा ज्ञातिभिः सहः ।। चरितामृते । सख्य भक्त श्रीदामादि पुरे भीमार्जुन । शान्तेर गुण दास्येर सेवन सख्ये दुइ हय । दास्येर संभ्रम गौरव सख्ये विश्वास मय ।। कान्धे चडे कान्धे चडाय करे क्रीडारण । कृष्ण सेवे कृष्णे कराय आपन सेवन ।। सख्य वात्सल्य रति पाय अनुरागसीमा । सुबलाद्येर भाव पर्यन्त प्रेमेर महिमा ।। ९८ ।।

"Sakhya Rasa" is the third Primary Rasa. ॥ 98 ॥

### ओं हरिः ॥ वात्सल्य रसः ॥ हरिः ओं ॥ ९९ ॥

पाराशर्यायण श्रुतिः ।। अंशोह्येष परस्य योऽयं पुमानुत्पद्यते च म्रियते च नानाह्येषं व्यपदिशति पितेति पुत्रेति भ्रातेति च सखेति चेति ।। भागवते । तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्यदोर्भिः परिरभ्य निर्भरं । स्नेहस्नुतस्तन्य पयः सुधासवं मत्वा परं ब्रह्म सुतानपाययन् ।। चरितामृते । वात्सल्य भक्त पिता माता यत गुरु जन । वात्सल्ये शान्तेर गुण दास्येर सेवन ।। सेइ सेइ सेवनेर इँहा नाम पालन ।। सख्येर गुण असंकोच अगौरव आर । ममताधिक्ये ताडन भर्त्सन व्यवहार ।। आपनाके पालक ज्ञान कृष्णे पाल्य ज्ञान । चारि रसेर गुणे वात्सल्य अमृत समान ।।९९।।

"Vātsalya-Rasa" is the fourth Primary Rasa. ॥ 99 ॥

### ओं हरिः ॥ मधुर रसः ॥ हरिः ओं ॥ १०० ॥

बृहदारण्यके । तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किंच नवेद नान्तरमेवायं पुरूषः प्रज्ञानात्मना सम्परिष्वक्तो न वाह्यं किंच नवेद नातरं ।। भागवते । एवं शशांकांशु विराजिता निशाः ससत्य कामोऽनुरताबलागणाः । सिषेव आत्मन्यवरूद्ध सौरतः सर्वा

शरत्काव्य कथारसाश्रयाः ।। चरितामृते । मधुर रसे कृष्ण निष्ठा सेवा अतिशय । सख्ये असंकोच लालन ममताधिक हय । कान्त भावे निजांग दिया करेन सेवन । अतएव मधुर रसे हय पंच गुण ।। एइ मते मधुरे सब भाव समाहार । अतएव आस्वादाधिक्ये करे चमत्कार ।। रूढ अधिरूढ भाव केवल मधुर । अधिरूढ महाभाव दुइ त प्रकार ।। १०० ।।

"Madhura-Rasa" is the fifth Primary-Rasa. ॥ 100 ॥

**ओं हरिः ॥ उत्तरोत्तर मुख्य रस प्रशंसा ॥ हरिः ओं ॥ १०१ ॥**

बृहदारण्यके । अणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवृत्तो मयैषः । तेन धीरा अपि यान्ति ब्रह्मविदो लोकमित ऊर्ध्वा विमुक्ताः ।। ब्रह्मसंहितायां । धर्मानन्यान् परित्यज्य मामेकं भज विश्वसन् । यादृशी यादृशी श्रद्धा सिद्धिर्भवति तादृशी ।। चरितामृते । पंचविध रस शान्त दास्य सख्य वात्सल्य । मधुर नाम शृंगार भावेते प्रावल्य ।। १०१ ।।

These five Primary Rasas are successively superior to each other. ॥ 101 ॥

**ओं हरिः ॥ हास्याद्भुत वीरकरूण रौद्रभयानक बीभत्सेति गौणरसः सप्तविधः ॥ हरिः ओं ॥ १०२ ॥**

हास्यरसस्तलबकारे ।। त ऐक्षान् तास्माकं एवायं विजयोऽस्माक मेवायं महिमेति ।। तत्रैवाद्भुतरसः । तन्नव्या जानन्त किमिदं यक्षमिति ।। वीररसः श्वेताश्वतरे ।। वीरान् मानो रूद्र इत्यादि ।। करूणरसः श्वेताश्वतरे । अनीशया शोचति मुह्यमानः ।। रौद्रस्तत्रैव । एवोहि रूद्रोन द्वितीयाय तस्तूर्य इमा ल्लोँकान् ईशते ईशानीभिः ।। भयानक कठे ।। महद् भयं वज्रमुद्यतं भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचमः ।। भीभत्स श्छान्दोग्ये । इमानि रूद्राण्य सकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येत-त्तृतीयस्थानं तेनासौ लोके न सम्पूर्यते तस्माज्जुगुप्सते ।। अग्निपुराणे । रागाद् भवति शृंगारो रौद्रस्तेक्ष्णात् प्रजायते । वीरोऽरष्टम्भुजः संकोच भूर्वीभत्स इष्यते । शृंगाराज्जायते हासो रौद्रा त्तुकरुणा रसः । वीराच्चाद्-भुत निष्पत्तिः स्याद् वीभत्साद् भयानकः ।। श्री रूपः । हास्योद्भुतस्तथा

वीरः करुणो रुद्र इत्यपि। भयानकः स वीभत्सः इति गौणश्च सप्तधा ।। १०२ ।।

The seven types of secondary Rasas are,-Hāsya, Adbhuta, Veera, Karuna, Raudra, Bhayānaka and Bibhatsa. ॥ 102 ॥

ओं हरिः॥ गौणास्तु मुख्यान् परिचरन्तो भक्ति रसाब्धिं परिवर्धयन्ति॥ हरिः ओं ॥ १०३ ॥

इति रस प्रकरणं समाप्तं ।

मुण्डके। यथा नद्याः स्यन्द मानाः समुद्रन्तं गच्छन्ति नामरूपे विहायतथेति ।। अग्निपुराणे । अपार काव्य संसारे कविरेव प्रजापतिः। तथावैरोचते विश्वं तथेदं परिवर्तते । शृंगारो चेत् कविः काव्ये जातं रसमयं जगत्।। सचेत् कविर्वीतरागो नीरस व्यक्तमेव तत् ।। कविभिर्योजनीया वैभवाः काव्यादिके रसाः। विभाव्यतेहि रत्यादिर्यत्र येन विभाव्यते।। श्री रूपः। भक्तानां पंचधोक्तानामेषां मध्यत एवहि । क्वान्तेकः क्वाप्यनेकश्च गौणेश्वालम्बनो मतः ।। अमीपंचैव शान्ताद्याहरेर्भक्ति रसामताः । एषु हास्यादयः प्रायो विभ्रति व्यभिचारितां ।। १०३ ।।

इति रस प्रकरण भाष्यं समाप्तं ।

Secondary Rasas when mix together with the Primary ones, the ocean of Bhakti Rasa gets swollen. ॥ 103 ॥

---

## रसास्वादन प्रकरणं

ओं हरिः ॥ सामग्री चतुर्विधा ॥ हरिः ओं ॥ १०४ ॥

माण्डूक्ये । ब्रह्म चतुष्पात् ।। अग्निपुराणे स्थायिन्यष्टो रति मुख्या स्तम्भाद्या व्यभिचारिणः। मनोऽनुकूलेऽनुभवः सुखस्य वतिर्रिरियते।। श्री रूपः । अथास्य केशवरतेः लक्षिताया निगद्यते । सामग्री परिपोषेण परमारस रूपता । विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः। एषा कृष्णरति स्थायी भावो भक्तिरसो भवेत् ।। १०४ ।।

"Sāmagri" in the transcendental sentiments is of four types. ‖ 104 ‖

**ओं हरिः ।। आलम्बनोद्दीपनात्मको विभावः ।। हरिः ओं ।। १०५ ।।**

कठे । एतदालम्बनं श्रेष्ठ मेतदालम्बनं परं । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ।। अग्निपुराणे । विभाव नाम सद्वेधालम्बनो द्दीपनात्मकः रत्यादिभाववर्गोयं यमाजीव्योपजायते ।। श्रीरूपः । तत्र ज्ञेया विभावास्तु रत्यास्वादन हेतवः । ते द्विधालम्बना एके तथैवोद्दीपना परे ।। १०५ ।।

The first 'Sāmagri' is known as "Vibhāva", and it is of two types viz., "Ālambana" and "Uddipana". ‖ 105 ‖

**ओं हरिः ॥ त्रयोदश लक्षणात्मकोऽनुभावः ॥ हरिः ओं ॥ १०६ ॥**

तैत्तिरीयके । भृगुस्तस्मै याता विशन्ति तद्विजिज्ञासस्व तन्त्रयोदशन्नं प्राण मनो विज्ञानमिति ।। अग्निपुराणे । आरम्भ एव विदुषामनुभाव इति स्मृतः ।। सचानुभूयते चात्र भवत्युत निरूच्यते । श्रीरूपः ।। नृत्यं विलुठितं गीतं क्रोशनं तनुमोट्टनं हुंकारो जृम्भनं श्वास भूमालोकानपेक्षिता लालास्रावोट्टहास श्च घूर्णा हिक्कादयोपि च ।। १०६ ।।

The second Sāmagri is known as "Anubhāva", it is of thirteen types. ‖ 106 ‖

**ओं हरिः ॥ अष्ट लक्षणः सात्विकः ॥ हरिः ओं ॥ १०७ ॥**

मुण्डके । प्राण ह्येष यः सर्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी । आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ ।। अग्निपुराणे । अष्टोस्तम्भादयः सत्वाद्रजस स्तमसः परं ।। श्रीरूपः । चित्तं सती भवत् प्राणेन्यस्यत्यात्मानमुद्भटं । प्राणस्तु विक्रियां गच्छेद्देहं विक्षोभयत्यलं तदास्तम्भादयो भावा भक्तदेहे भवन्त्यमी । ते स्तम्भ स्वेद रोमांचाः स्वरभेदोथवेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका स्मृताः ।। १०७ ।।

"Sātvika Bhāva" is the third Sāmagri, and it eight types. ‖

**ओं हरिः ॥ संचारिस्तु त्रयस्त्रिंश लक्षणः ॥ हरिः ओं ॥ १०८ ॥**

ऐतरेये । यदेतद् हृदयं मनश्चैतत् संज्ञान माज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टि धृति स्मृति मनीषा जूतिः स्मृतिः संकल्पः क्रतु रसु कामोवश इति ।। सर्वान्येवैतानि प्रज्ञानस्यनामधेयानि भवन्ति ।। अग्निपुराणे । वैराग्यादि मनः खेदो निर्वेद इति कथ्यते इत्यादि ।। श्रीरूपः।। निर्वेदोऽथ विषादो दैन्यं ग्लानि श्रमौ च मदगर्वौ । शंकात्रासावेगा उन्मादापस्मृती तथाव्याधिः । मोहो मृतिरालस्यं जाड्यं व्रीडावहित्था च । स्मृतिरथ वितर्क चिन्तामति धृतयो हर्ष उत्सुकत्वंच । औग्रचा मर्षासूयाश्चापल्य चैव निद्राच । सुप्तिर्वोध इति मे भावा व्यभिचारिणः समाख्याताः ।। १०८ ।।

The fourth Sāmagri is known as "Sanchāri" or "Vyabhichāri", and it is of thiry-three types. ॥ 108 ॥

**ओं हरिः ॥ भक्तिरसोहि माया गन्धशून्य परमार्थ स्वरूपगत चिद्वैचित्रं ॥ हरिः ओं ॥ १०९ ॥**

बृहदारण्यके । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानु ध्यायाद् बहूच्छन्दाद्वाचो विग्लापनं हितत् ।। तापनी श्रुतिः । सकलं परं ब्रह्मैवैतत् यो ध्यायति रसयति भजति सोऽमृतो भवति सोऽमृतो भवतीति ।। भागवते । निभृत मरून्मनोक्ष दृढ योगयुजो हृदि यन्मुनय उपासते तदरयोपि ययुः स्मरणात् । स्त्रिय उरगेन्द्र भोग भुजदण्ड विषक्त धियो वयमपि ते समां सम दृशोऽङ्घ्रिसरोजसुधाः ।। श्रीरूपः । सर्वथैव दुरूहोऽयमभक्तैर्भगवद्रसः । तत्पादाम्बुज सर्वस्वै र्भक्तिरेवानुरस्यते ।। परमानन्द तादात्म्याद्रत्यादेरस्य वस्तुतः । रसस्य स्वप्रकाशत्व मखण्डत्वंच सिध्यति ।। १०९ ।।

'Bhakti-Rasa' is the transcendental distinctive principle pertaining to the Supreme Reality and it is entirely free from the unwholesomeness of Māyā ॥ 109 ॥

**ओं हरिः ॥ श्री कृष्ण लीलास्तु सर्वरस प्रतिष्ठा ॥ हरिः ओं ॥ ११० ॥**

गोपाल तापनी । तदुहोवाच हैरण्यो गोपवेशमभ्राभं तरूणं कल्पद्रुमाश्रितं । तस्मात् कृष्ण एव परो दैवस्तं ध्यायेत्तं रसयेत् तं यजेत् तं भजेदिति ॐ तत्सदिति ।। छान्दोग्ये । श्यामाच्छवलं प्रपद्ये

शवलाच्छामं प्रपद्ये ।। श्री विष्णु पुराणे । यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृती: ।। चरितामृते । कृष्णेर यतेक खेला, सर्वोत्तम नरलीला, नरवपु ताहार स्वरूप । गोपवेश वेणुकर, नव किशोर नटवर, नरलीला हय अनुरूप ।। योगमाया चिच्छक्ति, विशुद्ध सत्व परिणति, तार शक्ति लोक देखाइते । एइरूप रतन, भक्तगणेर गूढ धन, प्रकट कैल नित्य लीला हैते ।। ११० ।।

All the Rasas in their entirety are found only in the Sports of Lord Krishna. ‖ 110 ‖

**ओं हरिः ॥ विशुद्ध रागमार्गेण सैवान्वेष्टव्या ॥ हरिः ओं ॥ १११ ॥**

गोपाल तापनी ।। यो वै कामान् कामयते स कामी भवति यो त्वकामेन कामान् कामयते सोऽकामी भवति ।। ब्रह्मसंहितायां । श्रिय: कान्ता: कान्त: परमपुरुष: कल्पतरवो द्रुमा भूमिश्चिन्तामणी गुणमयी तोय ममृतं । कथा गानं नाट्यं गमन मपि वंशी प्रियसखी चिदानन्दं ज्योति: परमपि तदास्वाद्य मपि च ।। चरितामृते । रागभक्ति विधि-भक्ति हय दुइ रूप । स्वयं भगवत्व प्रकाश दुइत स्वरूप ।। रागभक्ते व्रजे स्वयं भगवान पाय । विधि भक्ते पार्षद देहे वैकुण्ठेते याय ।। १११ ।।

Krishna-Lila should be sought-after in the spontaneous spiritual service of the Unalloyed devotion. ‖ 111 ‖

**ओं हरिः ॥ स्वेन सिद्ध स्वरूपेण तत् प्रवेशन्तु जीव चरम महिमा ॥ हरिः ओं ॥ ११२ ॥**

छान्दोग्ये । अथ स एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूप सम्पद्य स्वेन रूपेनाभिनिष्पद्यते एषआत्मेति होवाच तदमृत मभय मेतद् ब्रह्मेति तस्यहवा एतस्य नाम सत्यमिति ।। महाकौर्मे । अग्निपुत्रा महात्मानस्तपसा स्त्रीत्व मापिरे । भर्तारं च जगद् योनिं वासुदेव मजं विभुं ।। पद्म पुराणे । तेसर्वे स्त्रीत्व ।सम्पन्ना: समुद्भूताश्च गोकुले । हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात् ।। श्री रूप: । पति पुत्र सुहृद् भ्रातृ पितृवन्मित्रवद्धरिं । ये ध्यायन्ति सदोद्युक्तास्तेभ्योपीह नमोनम: ।। ११२ ।।

It is the highest attainment of the jiva-souls to enter the field of Krishna Lila, after gaining ones own spiritual form. ॥ 112 ॥

**ओं हरिः ॥ तत्रैव तद्‌भजनं तद्रसनं शुद्ध चिन्मये स्वरूपेण सिध्यति ॥ हरिः ओं॥ ॥ ११३ ॥**

इति रसास्वादन प्रकरणं समाप्तम् ।

गोपालोपनिषदि । तासां मध्ये हि श्रेष्ठा गान्धर्वीत्युच्च तंहि वैताभिरेवं विचार्यं । तांहि मुख्यां विधाय पूर्वमनुकृत्वा तूष्णीमास ॥ ब्रह्मसंहितायां । सहस्रपत्र कमलं गोकुलाख्यं महत्‌पदं । तत्कर्णिकारं तद्धाम तदनन्तांश सम्भवं । कर्णिकारं महद्यन्त्रं षट् कोनं वज्रकीलकं । षडंग षट्‌पदी स्थानं प्रकृत्या पुरूषेण च । प्रेमानन्द महानन्द रसेनावस्थितं हि यत् । ज्योति रूपेण मनुना कामबीजेन संगतं । तत् किंजल्कं तदंशानां तत्र पत्राणि श्रियामपि ॥ श्रीरूपः । कृष्णादिभिर्विभावाद्यैर्गतेरनुभवाध्वनि । प्रौढानन्दचमत्कार काष्ठा मापद्यते परां ॥ ११३ ॥

इति रसास्वादन प्रकरण भाष्यं समाप्तं ।

Spiritual service and bliss of devotion to Lord Krishna are manifested in the supra-mundane plane in the transcendental Form. ॥ 113 ॥

---

## सम्पत्ति प्रकरणं

**ओं हरिः ॥ अधिकार क्रमेण ह्युत्तरोत्तर प्राप्तिः ॥ हरिः ओं ॥ ११४ ॥**

बृहदारण्यके । यतो यतस्त्वाददीत लवण मेवैवं वा अरइद महद् भूत मनन्तमपारं विज्ञान घन एव ॥भागवते । स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । विपर्यंयस्तु दोषः स्यात् उभयोरेष निर्णयः ॥ क्वचिद् गुणोपि दोषः स्यात् दोषापि विधिना गुणः । गुणदोषाथ नियमस्तद् भिदामेव बाधते ॥ यतो यतो निवर्तेत विमुच्येत ततस्ततः । एष धर्मो नृणां क्षेमः शोक मोह भयापहः ॥ चरितामृते । अधिकारी भेदे रति पंचप्रकार ॥ शान्त दास्य सख्य वात्सल्य मधुर आर ॥११४॥

Various spiritual planes mentioned above are attainable by the jiva-souls according to the individual spiritual merits. ॥ 114 ॥

**ओं हरिः ॥ निर्गुण श्रद्धामूला हि वैधी भक्तिः ॥ हरिः ओं ॥११५ ॥**

बृहदारण्यके । कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिर धृति र्ह्री र्धी र्भी रित्येतत् सर्वं मन एव ॥ श्रद्धां भगवो विजिज्ञास इति ॥ भागवते । सात्विक्याध्यात्मिकी श्रद्धा कर्म श्रद्धातु राजसी । तामस्य धर्मे याश्रद्धा मत्सेवायान्तु निर्गुणाः । यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् । न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥ गीतायां । तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः । कर्मिभ्योश्चाधिको योगी तस्माद् योगी भवार्जुन ॥ योगिनामपि सर्वेषां मद्‌गतेनान्तरात्मना । श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ श्री रूपः ॥ आदौ श्रद्धा ततः साधु संगोऽथ भजन क्रिया ततोऽनर्थ निवृत्तिःस्यात्ततो निष्ठा रुचिस्ततः । अथासक्ति स्ततो भाव स्ततः प्रेमाभ्युदंचति । साधकाना मयं प्रेम्नः प्रादुर्भावे भवेत् क्रमः ॥ ११५ ॥

" Vaidhi Bhakti ", as codified by the scriptures,- is generated by the faith in the transcendental Divinity. ॥ 115 ॥

**ओं हरिः ॥ रुचिमूलाहि रागानुगा भक्ति ॥ हरिः ओं ॥ ११६ ॥**

बृहदारण्यके । तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा ॥ भागवते । हरेर्गुणाक्षिप्त मति र्भगवान् बादरायणिः । अध्यगन्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ श्रीजीवः । विषयिनः स्वाभाविको विषय संसर्गेच्छातिशय मयः प्रेमा रागः । येषामहं प्रिय आत्मा सुतश्च सखा गुरु सुहृदीदैवमिष्टमित्यादौ । तदेवं तत्तदभिमान लक्षण भाव विशेषण स्वाभाविक रागस्य वैशिष्ट्य सति तत्तद्राग प्रयुक्ता श्रवण कीर्तन स्मरण पादसेवन वन्दनात्म निवेदनप्राया भक्तिः तेषां रागात्मिका भक्ति रित्युच्यते । यस्य पूर्वोक्त रागविशेषे रुचिरेव जातास्ति तस्य रागात्मिकाया भक्तेः परिपाटीष्वपि रुचिर्जायते । अतस्तदीयं रागं रुच्यनुगत्यतीति रागानुगा तस्यैव प्रवर्तते ॥११६॥

The origin of 'Rāgānuga Bhakti' is the strongest inclination after following the spiritual services of Vrajavāsis. ॥ 116 ॥

ओं हरिः ॥ महिमा ज्ञान युक्ता हि प्रथमा ॥ हरिः ओं ॥ ११७ ॥

मुण्डके । द्वेविद्ये वेदितव्ये परा चैवापराच । तत्रापरा ऋग्वेदो यजुर्वेद इत्यादि ॥ पंचरात्रे । माहात्म्य ज्ञान मुक्तंच सुदृढ: सर्वथाधिक: । स्नेहो भक्तिरिति प्रोक्तस्तया सार्ष्टयादि नान्यथा ॥ श्री रूप: । महिमा ज्ञान युक्त: स्याद्विधि मार्गानुसरिणां ॥ श्री जीव: ॥ ततो विधिमार्ग भक्ति विधिमापेक्षेति सा दुर्बला ॥ ११७ ॥

'Vaidhi Bhakti' is associated or mixed with the Majestic aspect of the Supreme Lord. ॥ 117 ॥

ओं हरिः ॥ केवला हि द्वितीया प्रबला च ॥ हरिः ओं ॥ ११८ ॥

मुण्डके । अथ परा यया तदक्षरमधिगम्यते यत्र तददृश्य मग्राह्य मगोत्र मवर्ण मचक्षु: श्रोत्रं तदपाणि पादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् भूत योनिं परिपश्यन्ति धीरा: ॥ भागवते । गोप्य: कामाद् भयात् कंस द्वेषा च्चैद्यादयो नृपा: । सम्बन्धाद् वृष्णय: स्नेहात् यूयं भक्त्या वयं विभो ॥ श्री रूप: । रागानुगाश्रितानां तु प्रायश: केवलो भवेत् ॥ श्री जीव: । इयंच स्वतंत्रैव प्रवर्तते इति प्रवला च ज्ञेया ॥ ११८ ॥

"Rāgānugā-Bhakt is absolutely unmixed and quite stronger than Vaidhi-Bhakti. ॥ 118 ॥

ओं हरिः ॥ आसक्ति पर्यन्ता साधन भक्तिः ॥ हरिः ओं ॥ ११९ ॥

मुण्डके । बृहच्च तद्दिव्य मचिन्त्य रूपं सूक्ष्माच तत् सूक्ष्मतरं विभाति । दूरात् सदूरे तदिहान्ति केच पश्यत् स्विहैव निहितं गुहायां ॥ श्री नारायण पंचरात्रे । भावोन्मत्तो हरे किंचिन्नदेव सुखमात्मन: । श्री रूप गोस्वामी । वैध भक्त्यधिकारितु भावाविर्भावनावधि: अत्र शास्त्र तथा तर्क मनुकूलमपेक्षते ॥ साधनाभिनिवेशस्तु तत्र निष्पादयन् रुचि । हरावासक्तिमुत्पाद्य रतिं संजनयत्यसौ ॥ ११९ ॥

The performances of Sadhana-Bhakti are extended, only upto 'Asakti' or the firm attachment to the Supreme. It follows from Shraddha, Sadhu-sanga, Bhajana-Kriya, anartha-nivritti, Nisthā, Ruchi and then Asakti. ‖ 119 ‖

**ओं हरिः ॥ भावान्महाभाव पर्यन्ता ह्लादिनी सार समवेत सम्विद्रूपा सिद्धाभक्ति ॥ हरिः ओं ॥ १२० ॥**

सौपर्ण श्रुतिः । सर्वदिन मुपासीत यावद्विमुक्तिः । मुक्ताह्येन मुपासते ।। बृहत्तन्त्रे । यथा श्री नित्य मुक्तापि प्राप्तकामापि सर्वदा । उपास्ते नित्यशो विष्णुमेवं भक्तो भवेदपि ।। श्री नारदः । भद्र मुक्तं भवद्भिस्तु मुक्ति स्तुर्या परात्परा ।निरहं यत्र चित् सत्ता सतुर्या मुक्ति उच्यते ।। पूर्णाहन्तामयी भक्तिस्तुर्यातीता निगद्यते । कृष्ण राम मयं ब्रह्मक्वचित् कुत्रापि भासते । निर्वीजेन्द्रियता तत्र आत्मस्थं केवलं सुखं । कृष्णस्तु परिपूर्णात्मा सर्वत्र सुखरूपकः।। श्री रूपः। स्यादृढेयं रतिः प्रेम्ना प्रोद्यन् स्नेहः क्रमादयं । स्यान्मानः प्रणयो रागोऽनुरागो भाव इत्यपि । वीज मिक्षु सच रसः सगुडः खण्ड एव सः । स शर्कर सिता सा च सा यथा स्यात् सितोत्पला । इयमेव रतिः प्रौढा महभाव दशां व्रजेत् ।। सिद्धान्त रत्ने । तथा च ह्लाद सम्विदोः समवेतयोः सारो भक्तिरिति सिध्यति । तत् सारत्वंच तन्नित्य परिकराश्रयक तदानुकूल्याभिलाष विशेषः।।१२०।।

The Bhakti From Bhava upto Mahabhava, is known as Siddha Bhakti or the 'absolutely transcendental principle' of devotion. This Siddha Bhakti is of the form of Sambit-Shakti incorporating the blissful essence of Hlādini. ‖ 120 ‖

**ओं हरिः ॥ उपाधि वियोगे स्वरूपोदयोहि मुक्तिः ॥ हरिः ओं ॥१२१॥**

छान्दोग्ये । स आत्माऽपहत पाप्मा विजरो विमृत्यु विशोकोऽविजिघत्सोऽपिपासः सत्यकाम सत्य संकल्पः स विजिज्ञासितव्यः ।। विष्णुपुराणे । निरस्तातिशयाह्लाद सुखभावैक लक्षणा । भेषजं भगवत् प्राप्तिरेकान्तात्यन्तिकी मताः ।। भागवते । मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः ।। श्री जीवः । स्वरूपेण व्यवस्थितिर्नाम स्वरूप साक्षात्कार उच्यते ।। ।। १२१ ।।

When the phenomenal propensities of the jiva soul are nullified, once again it attains the normal spiritual character. This is called as Mukti. ॥ 121 ॥

**ओं हरिः ॥ सा स्वरूपसिद्धा वस्तुसिद्धाचेति द्विविधा ॥ हरिः ओं ॥ १२२ ॥**

स्वरूपसिद्धा मुक्ति बृहदारण्यके। यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि स्थिताः। अथ मर्तोऽमृत भवत्यत्र ब्रह्म समुश्नुते ।। वस्तु सिद्धाच छान्दोग्ये । अथ एष सम्प्रसादोऽस्मा च्छरीरात् समुत्थाय परं ज्योतिरूप सम्पद्य स्वेन रूपेणाभिनिष्पद्यते ।। स्वरूपसिद्धा भागवते । यत्र मे सद-सद्रूपे प्रतिषिद्धे स्वसंबिदा । अविद्ययात्मनि कृते इति तद् ब्रह्मदर्शनं ।। वस्तुसिद्धा तत्रेव । यद्येषोपरतादेवी माया वैशारदी मतिः । सम्मन्न एवेति विदुर्महिम्निस्वे महीयते ।। श्री जीवः । मुक्तौ जीवदवस्थामाह । अकिंचनस्य दान्तस्य शान्तस्य समचेतसः । मया सन्तुष्ट मनसः सर्वा सुखमयादिशः तत्रोत्क्रान्तावस्थायां सैवाऽन्तिमा मुक्तिश्च पंचधा । सालोक्य सार्ष्टि सारूप्य सामीप्य सायुज्येति भेदेन । एषाच पंचविधापि गुणातीता सायुज्येच आन्तर साक्षात्कार एव । तथापि प्रकट स्फूर्ति लक्षणं तत् सुषुप्तिवदनति प्रकट स्फूर्ति लक्षणाद् ब्रह्मसायुज्याद्-भिद्यते ।। १२२ ।।

The Mukti is of two types namely, ' Swarupasiddhā" and " Vastusiddhā " ॥ 122 ॥

**ओं हरिः ॥ सा भक्तेरनपायिनी सहचरी ॥ हरिः ओं ॥ १२३ ॥**

गोपालोपनिषदि । भक्तिरहस्य भजनं तदिहामुत्रोपाधि नैरास्ये नैवास्मिन् मनसः कल्पनमेतदेवच नैष्कर्म्यं ।। नारद पंचरात्रे । हरिभक्ति महादेव्याः सर्वामुक्तादिसिद्धयः । भुक्तयश्चाद्भुतास्तस्या श्चेटीकावदनु-व्रताः । श्री जीवः । प्रीत्यैव आत्यंतिक दुःख निवृत्तिश्च । सा प्रिति विना तत् स्वरूपस्य तद्धर्मान्तर वृन्दस्यच तत्साक्षात्कारो न सम्पद्यते । यत्रसा तत्रावश्यमेव सम्पद्यते । यावत्येव प्रीति संपत्ति स्तावत्येव तत् सम्पत्तिः । सुखंच निरूपाधि प्रीत्यास्वादु । तस्मात् पुरूषेण सैव सर्वदा अन्वेष्टव्येति ।। १२३ ।।

That Mukti is the constant follower of Bhakti ॥ 123 ॥

**ओं हरिः॥ भक्तिः कदाचित् ज्ञान वैराग्य परिसेविता॥ हरिः ओं ॥१२४॥**

कठे। पराच कामाननुयन्ति कामाननुयन्ति वालास्ते मृत्योर्यन्ति विततस्य पाशं। अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते॥ भागवते। तच्छ्रद्दधाना मुनयो ज्ञान वैराग्य युक्तया। पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुत गृहीतया॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानंच यदहैतुकं। श्री रूपः॥ ानवैराग्ययोर्भक्ति प्रवेशायोपयोगिता। इषत् प्रथममेवेति नांगत्वं उचितं तयोः॥ यदुभे चित्तकाठिन्ये हेतुप्राये सतां मते। सुकुमार स्वभावेयं भक्तिन्तत् हेतु जीविता॥ किन्तु ज्ञानविरक्तादि साध्यं भक्त्यैव सिध्यति॥ १२४॥

Sometimes Bhakti may accept the services of Jnana and Vairagya (knowledge and abnegation) ॥ 124 ॥

**ओं हरिः॥ स्वतस्तदपेक्षा शून्या स्वतन्त्राच॥ हरिः ओं॥ १२५॥**

तैत्तिरीये। आनन्दो ब्रह्मणो विद्वान् न विभेति कुतश्च नेति॥ भागवते। न साधयति मां योगो न सांख्यं धर्म मुद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता॥ भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां। भक्तिः पुनाति मन्निष्ठा श्वपाकान्यपि सम्भवात्॥ वाग् गद्गदा द्रवते यस्य चित्तं रूदत्यतीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद् भक्तियुक्तो भुवनं पुनाति॥ श्री रूपः। प्रोक्तेन लक्षणेनैव भक्तेरधिकृतस्य च। अंगत्वेसु निरस्तेपि नित्याद्यखिल कर्मणाम्॥ ज्ञानस्याध्यात्मिकस्यापि वैराग्यस्य च फल्गुणः। स्पष्टतार्थं पुनरपि तदेवेदं निराकृतं॥ धन शिष्यादिभिर्द्वारैर्या भक्तिरुपपद्यते विदूरत्वादुत्तमताहान्यातस्याश्च नांगता। विशेषणत्व मेवैयां संश्रयन्त्यधिकारिणां। विवेकादीन्यतोऽमीषामपि नांगत्वमुच्यते॥ कृष्णोन्मुखं स्वयं यान्ति यमाः शौचादयस्तथा। इत्येषांच नयुक्ता स्याद् भक्त्यंगान्तर पातिता॥
॥ १२५॥

By nature, Bhakti is absolute and it is independent of knowledge and abnegation. ॥ 125 ॥

ओं हरिः ॥ सा जीव स्वभाव महिमरूपा ॥ हरिः ओं ॥ १२६ ॥

बृहदारण्यके। एषास्य परमागति रेषास्य परमा सम्पदेषास्य परमो लोक एषास्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रा मुपजीवन्ति ।। भागवते । अहो भाग्य महो भाग्यं नन्दगोप ब्रजौकसां। यन्मित्र परमानन्दं पूर्णब्रह्म सनातनं ।। श्री जीवः। स्वरूपशक्ति सम्बन्धान्मायान्तर्धाने संसारनाशः । येषां तु मते मुक्तावानन्दानुभवो नास्ति तेषां पुमर्थता न सम्पाद्यते। स्वतोपि वस्तुनः स्फूरणाभावे निरर्थकत्वात् । न च सुखमहंस्यामिति कस्य विदिच्छा । किन्तु सुख-महमनुभवामीत्येव। तत् सम्पत्ति लाभात् स्वे महिम्नि स्वरूप सम्पत्तावपि महीयते पूज्यते प्रकृष्ट प्रकाशो भवतीत्यर्थः ।। १२६ ।।

That Bhakti is the glory of the unalloyed character of the jiva-souls. ‖ 126 ‖

ओं हरिः ॥ बद्धानां सा केवलं साधु प्रसंगजा ॥ हरिः ओं ॥ १२७ ॥

श्वेताश्वतरे । यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मनः ।। भागवते। भवापवर्ग भ्रमतो यदाभवेज्जनस्य तर्ह्यच्युत सत्समागमः । सत्संगमो यर्हितदैव सद्गतौ परावरेशे त्वयि जायते रतिः ।। श्रीमन्महाप्रभुः । कृष्णभक्ति जन्ममूल हय साधुसंग।। श्री रामानुजस्वामी। वैष्णवानां हि संगत्या सम्यग् ज्ञानं प्रजायते। तेन निश्रेयस प्राप्ति र्भविष्यति सुनिश्चयं ।। अतः सर्वात्मना कार्या वैष्णवानां हि संगतिः । प्रतिकूलादि संसर्गमानसं भाषणादयः । सुदूरतः परित्याज्याः प्रपन्नानां महात्मनां । अयं हि चरमोपायो नान्योपायस्ततः परं ।। १२७ ।।

Fallen souls may acquire that Bhakti only in the holy association. ‖ 127 ‖

ओं हरिः ॥ भगवत् कृपाहेतुका ॥ हरिः ओं ॥ १२८ ॥

कठे। अणोरणीयान् महतोमहीयान्नात्मास्य जन्तोर्निहिता गुहायां। तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ।। नारदसूत्रे। मुख्यतस्तु महत् कृपयैव भगवत् कृपालेशाद्वा ।। श्री वल्लभस्वामी ।

महतां कृपया यावद् भगवान् दययिष्यति । तावदानन्द सन्दोहः कीर्तमानः सुखायहि ।। १२८ ।।

At times this Bhakti is directly acquired by the grace of Lord Krishna. ॥ 128 ॥

**ओं हरिः ॥ आम्नाय प्रभवाच ॥ हरिः ओं : ॥ १२९ ॥**

मुण्डके । ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्या प्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ।। अथर्वेण यां प्रवदेत ब्रह्माऽथ र्वतां पुरोवाचांगिरे ब्रह्मविद्यां स भारद्वाजाय सत्यवाहाय प्राह भरद्वाजोऽगिरसे परावरां ।। शौनको हवै महाशालोऽगिरसं विधिवदुपसन्नः पप्रच्छ । कस्सिन् भगवो विज्ञाप्ते सर्वमिदं विज्ञातं भवतीति ।। पद्म पुराणे । संप्रदाय विहीना ये मन्त्रास्ते विफलामताः । अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः । श्री ब्रह्म रूद्र सनका वैष्णवाः क्षिति पावनाः । चत्वारस्ते कलौ भाव्या ह्युत्कले पुरूषोत्तमात्।। भाष्यकार श्री बलदेवः । श्रीकृष्ण ब्रह्मदेवर्षि बादरायण संज्ञकान् । श्री मध्व श्री पद्मनाभ श्रीमन्नृहरि माधवान् । अक्षोभ्य जयतीर्थं श्री ज्ञानसिन्धु दयानिधीन् । श्री विद्यानिधि राजेद्र जयधर्मान् क्रमाद्वयं । पुरूषोत्तम ब्रह्मण्य व्यासतीर्थां श्च संस्तुमः । ततो लक्ष्मीपतिं श्रीमान् माधवेन्द्रश्च भक्तितः ।। तच्छिष्यान् श्रीश्वराद्वैत नित्यानन्दान् जगद्गुरूं । देवमीश्वर शिष्यं श्री चैतन्यंच भजामहे । श्री कृष्ण प्रेमदानेन येन निस्तारितं जगत् ।। १२९ ।।

This Bhakti is spread in the world by the deductive way of Vedic and Preceptorial succession. ॥ 129 ॥

**ओं हरिः ॥ पुरुष चेष्टा ह्यदृष्ट जनन्यथ साधवः सर्वात्मना सेव्याः ॥ हरिः ओं ॥ १३० ॥**

इति श्रीमदाम्नाय सूत्रे प्रयोजनतत्व निरुपणें सम्पत्ति प्रकरणं समाप्तं ।

इति श्री आम्नाय सूत्रे प्रयोजन तत्वं सम्पूर्णं ।

श्री आम्नाय सूत्रं सम्पूर्णं ।।

बृहदारण्यके । सवायं पुरुषो जायमान: शरीरमभि संपद्यमान: पाप्नाभि: संसृज्यते स उत्क्रमेन: म्रियमान: पाप्ननो विजहाति ।। प्रश्ने । त्वंहि न: पिता योऽस्माक मविद्याया: परंपारं तारयसि । नम: परम ऋषिभ्यो नम: परम ऋषिभ्य:।। पाद्मो आराधनानां सर्वेषां विष्णोराराध न परं । तस्मात् परतरं देवी तदीयानां समर्चनं ।। न शूद्रा: भगवद् भक्ता स्तेषु भागवता नरा: । सववर्णेषु ते शुद्रा ये न भक्ता जनार्दने ।। महत् सेवा द्वारमाहुर्विमुक्ते स्तमोद्वारं योषितां संगिसंग: ।। भागवते । तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत् संगिसंगस्य मर्त्यानां किमुताशिष: ।। दुर्लभो मानुषोदेहो देहिनां क्षणभंगुर: । तत्रापि दुर्लभं मन्ये वैकुण्ठ प्रियदर्शनम् ।। नारद सूत्रे । नास्ति तेषु जाति विद्या रूप कुल धनक्रिया विभेद: ।। श्री मन्महाप्रभु: । साधुसंग साधुसंग सर्व शास्त्रे कय । लव मात्र साधु संगे सर्व सिद्धि हय ।। श्री बलराम दास: । भाइरें साधुसंग कर भाल हैया । ए भव तरिया यावे, महानन्द सुखपावे, निताइ चैतन्य गुण गाञ्या ।। चौराशी लक्षजन्म करिया श्रम, भालइ दुर्लभ देह पाञ्या । महतेर दायदिया, भक्तिपथे ना चलिया, जन्म याय अकारणे वैया ।। माला मुद्रा करि वेश, भजनेर नाहि लेश, फिरि आमि लोक देखाइया । माखालेर फल लाल, देखिते सुन्दर भाल, भांगिले से देय फेलाइया ।। चन्दन तरुर काछे, यत वृक्ष लता आछे, आत्म सम करे वायु दिया । हेन साधु संग सार, नाइ बलराम छार, भवकूपे रहिलाङ पडिया ।। १३० ।।

इति प्रयोजनतत्व भाष्यं समाप्तं ।

Human effort itself is the mother of destiny. Therefore, with all the efforts one should serve the holy persons and scriptures. ॥ 130 ॥

चैतन्य देवस्य चतु: शताब्दे नेत्राधिके भक्तिविनोदकेन ।
आम्नायमाला प्रभुभक्त कण्ठे गौडे प्रदाता हरि जन्म घस्रे ।।

हरिं वद हरिं वद ।।

श्री कृष्ण चैतन्यार्पणमस्तु ।।

ओं हरि: ।। शान्ति: शान्ति: शान्ति: ।। हरि: ओं ।।

THE END

R. SK. S. LIBRARY
Acc. No... 3431...
Class No. ............